CC0. In Public Domain, Digitizagtion by eGangotri

Balabodhini

Folio - 58.

## INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

| | |
|---|---|
| RECORD NO. 25 | LANGUAGE Skt. |
| ROLL NO. 5<br>Date of Filming 17-5-96 | |
| ACC NO. | SCRIPT Dev Nagari |
| Ms. No. 425 | |
| Bundle No. | |
| DEC NO. /R. NO. | MATERIAL Paper |
| DESCRITIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME : An Index to the Register of Mss. in the Pothikhana of Jaipur | |
| AUTHOR Jayadeva<br>Com. Caitanyadāsa | NO OF FOLIOS ~~PAGES~~ 58 |
| TITLE Gītagovindaṭīkā | COMPLETE/INCOMPLETE |
| WITH OR WITHOUT COMMENTARY<br>Bālabodhinī | REMARKS |
| SUBJECT<br>Kāvya | LOCATION The Maharaja Sawai Man Singh II Museum, Khasmohar Collection, JAIPUR |

Thana:

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Bala bodhini
Folio - 58.

श्रीराधाकृष्णचरणप्रसीदतु ॥ श्रीचैतन्यपादपद्ममधुमत्तेन केनचित् । टीकासंगृह्यते गीतगोविंदस्य समासतः ॥
॥१॥ स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः । टीका चैतन्यदासेन ग्रथ्यते बालबोधिनी ॥२॥ अत्र व्याकरणादी
नां ग्रंथबाहुल्यभीतितः ॥ विवृतिर्न कृता सास्याज्ज्ञेया ग्रंथांतरे बुधैः ॥३॥ बोद्धव्यो बालबोधिन्यां शब्दार्थः श
ब्दवेदिभिः ॥ भावार्थदीपिकायां च भावो भावार्थलोलुपैः ॥४॥ अथ श्रीराधामाधवयोर्विजनकेलिवर्णनमयं
श्रीगीतगोविंदाख्यं ग्रंथमारभमानस्तत्र च तयोः सर्वोत्तमतां निश्चिन्वानः श्रीमान् जयदेवनामा कविराजस्तमाल
वनतमःपुंजकुंजसदनाद्बहिः स्थितयोस्तयोस्तत्र प्रवेशाय गदितश्रीराधिकासखीवचनमनुस्मरन् तदेव मंगल
माचरति ॥ मेघैरिति ॥ श्रीराधामाधवयोः केलयो जयंति । सर्वेषां परमव्योमनाथादीनां च केलिभ्यः उत्कर्षेण व
र्तंते ॥ माधवस्य सर्वावतारेभ्यः श्रेष्ठ्यात् ॥ श्रीराधिकायाश्च तस्य सर्वप्रेयसीभ्यः श्रेष्ठ्यात् ॥ यथोक्तं श्रीसूतेन ॥ ए
ते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति ॥ यथा च बृहद्गौतमीये ॥ देवी कृष्णमयी प्रोक्ता राधिका परदेवता
। सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परेति ॥ राधामाधवयोरित्यत्र द्वंद्वसमासेन तयोः पारस्परिकविद्योतमानता १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यज्यते॥ यथोक्तं॥ अरूपरिशिष्टे॥ राधया माधवो देवो माधवेनैव राधिका विभ्राजन्ते जनेष्विति॥ शेषटीकाप्रमाणितप्रतिष्ठ॥ स एकाकी न रमते द्वितीयमैच्छत्॥ स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ न बाह्यं किंचन वेद नांतरं॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमुत मनसो ये मनो विदुरित्यादिका। अत्यर्थस्तु॥ स माधव एकाकी न रमते रंतुं न शक्नोति। अतो रमणोपयोगिनं द्वितीयमैच्छत् कामयामास। स ह्लादिनीशक्तिसारभूतया द्वितीयया श्रीराधया सह मिलित्वा एतावानास बभूव। यथा स्त्रीपुमांसौ स्त्रीपुरुषौ परिष्वक्तौ आलिंगनाद्याशक्तौ तथासौ माधवोपि द्वितीयप्रणयाविष्टो बाह्यं अनंतब्रह्मांडसृष्ट्यादि न वेद नांतरमनंतवैकुंठवैभवं च न वेद तया सह निरवधिकेलिसुखमेवानुबभूव॥ अतस्तस्याः प्राणस्य प्राणमित्यादि विदुः॥

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय। इत्थं नंदनिदेशत

लज्ञाः इति। इति शक्तिप्रतिपादिता सदानंदरूपिणी प्रत्यवयवशोभावती राधा माधवश्चैतयोः रहःकेलयः। प्रत्यूहःपुलकांकुरेणेत्यादिवक्ष्यमाणाः। रहःकेलय इत्यनेन प्रच्छन्नकामुकत्वं रागिणामत्यंतोत्कंठावृद्धिः स्यादिति ज्ञातः परं किंचिदुत्कर्षाधायकमिति व्यज्यते॥ जयंति। यमुनाकूले। किं [illegible]कृत्य। प्रत्यध्वकुंजद्रुमं कुंजेनोपलक्षितो द्रुमः कुंजद्रुमः अध्वनः कुंजद्रुमो ध्वकुंजद्रुमस्तं लक्ष्यीकृत्य तत्रेत्यर्थः॥ कीदृशयोः॥ नंदयतीति नंदः नंदश्चासौ निदेशश्चेति नंदनिदेशः विरचितचाटुवचनरचनमित्यादिश्रीराधासखीसंदेशस्तस्माच्चलितयोः। निदेशमेवाह॥ हे राधे यतोसौ नक्तं पूर्वरात्रौ त्वां विलायास्यामिः कृतकृत्यापराध

Dr. Urmila Sharma Collection, Varanasi

तयभीरुः भीतस्तत्कृतवञ्चनाधिक्यावलम्बनतारोपणाशंकीतस्मात्त्वमेव इमं त्वत्विमित्तानुभूतमन्मथव्यथं श्रीकृष्णं गृहं मेघु
तरकुंजतलेत्यादिवक्ष्यमाणं केलिसदनं प्रापय। पुरः केलिसदनमनुसरन्तीस्तस्य केलिसदनप्राप्तावनुकूला भवेतिसम
यानुकूल्यमाह ॥ मेघैरंबरमाकाशं मेदुरं स्निग्धमाच्छादितमित्यर्थः। मेघशब्देनात्र लक्षणया मेघसदृशो गाढांधकारे

ख्वलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः ॥१॥ ॥

गृह्यते न वर्षर्त्तुसूचनं ॥ वसंतस्याग्रे वर्णनीयत्वात् ॥ रासक्रीडायानात्यनुकूलं च अतोतिक्रमितजनसंचारायां रात्रौ नका
दिप्रतिबंधशंकेतिभावः ॥ निकटस्थप्रतिबंधशंकामपि वारयति वनभुवश्च तमालद्रुमैः श्यामानि विडांधकारैरलङ्कृताः
। गाढांधकारादीनि वृत्तिकमभिसरणहेतुभूतानि किमुतान्नीतिसमयानुकूल्यकथनेनोत्साहनं ॥ एतत्पद्यादिप्रार्थनानंतरमेत
न्नीलावसरे ग्रंथो निक्षिपदे जनमित्यादिनेयं सखीतौ संयोज्यतीति ॥१॥

निसमुदिता २

२

CC0. In Public Domain, Digitizagtion by eGangotri

एवमाद्यपद्यसूचितकेलिस्फुरणोपस्थापितानंदपूरप्लावितांतःकरणतयोद्घकारणेनाधुनिकभक्तजनानुग्रहपरवशःसन् कविरेत
त्केलिव्यक्तीकरणाय प्रबंधमनुसंदधदात्मनस्तत्सामर्थ्यं समर्थयन् प्रतिजानीते। जयंसर्वोत्कृष्टं श्रीकृष्णं द्योतयति स्वभक्त्या प्रका
शयतीति जयदेवः अतः स एव कविस्तत्कुलवर्णनकर्ता एतं श्रीगीतगोविंदाख्यं प्रबंधं प्रकर्षेण बध्यते श्रोतॄणां हृदयमस्मिन्निति प्र
बंधस्तं करोति प्रकाशयति। श्रोतृहृदयबंधनशक्तिरस्य कथं स्यात्। श्रीरत्राप्यनाधिकानंगीकारात् पूर्वोक्ता राधैव वसु धनं तेन दीव्य
तीति वसुदेवः श्रीनंदः द्रोणो वसूनां प्रवर इत्युक्तेस्तस्यापत्यं वासुदेवः माधवस्तयोर्यामिथ्योरतिकेलिकथास्ताभिः सहितं तत्के

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती। श्रीवासुदेवरतिकेलिकथासमेत
मेतं करोति जयदेवकविः प्रबंधं ॥ २ ॥

लिविशेषवर्णनरूपमित्यर्थः। एवं चेत् कथमयं तत्कर्तुं शक्नुयात्।
वाचो वक्त्र्यश्रुतेरुपस्थितानां स्वकेलिमधिगतं देवता श्रीकृष्णस्तच्चरित्रेण चित्ररूपेण चित्रितं लिखितं चित्तरूपं सद्म गृहं यस्य। एवं
वाङ्मनसवृत्तेर्माधवपरतोक्ता एतावतापि कथं तेन कृतिरतः कायिकवृत्तेः श्रीराधिकापरत्वमाह। पद्मं विद्यते करे यस्याः सा प
द्मावती श्रीराधा शरावत्यादीनामित्यादिग्रहणाद्दीर्घः। तस्याश्चरणयोश्चारणचक्रवर्ती नर्तकश्रेष्ठः नृत्यादिना सदा तदाराध
नपर इत्यर्थः। अनेन आत्मन उपासना तत्प्रधाना दर्शिता ॥ २ ॥

त्वे: ४

Dr. Urmila Sharma Collection, Varanasi

हि१ ति१ द१ पि१

एवमात्मनस्तद्योग्यतामापाद्य स्वेच्छैव प्रतिज्ञातेऽर्थेऽधिकारिजिज्ञासायां हि इंदयविनोदकत्वाँधिकारिणो निश्चिनोति ॥ भो महाज
नय दि हरिस्मरणे श्रीकृष्णानुचिंतने मनः सरसे मुख्योज्ज्वलरसवासितं यदि च विलासस्य रासकुंजादिलीलायाः कलासु वैदग्धी
चारुचेष्टासु कुतूहलं कौतुकमस्ति तदा जयदेवकवेः सरस्वतीं वाणीं शृणु ॥ नत्वन्यास्ति चेत्र ॥ अनेनाधिकारिवैरल्यं सूचि
तं ॥ एकवचनेन च ॥ केषांचित्सामान्यस्मरणमात्रे केषांचिद्विशिष्टरासकुंजादिलीलाः कलनमिति उभयोरुपादानं ॥ कीदृ

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं । मधुरको
मलकांतपदावलीं शृणु तदा जयदेवसरस्वतीं ॥ ३ ॥

श्यसौ यस्या एवमधिकारिणं निश्चिनोति । शृंगाररसप्राधान्यान्मधुरा अडितत्वर्णावगते कोमला गेयत्वात्कांता कमनीया पदावली
पदश्रेणी यस्यां ॥ एभिः पद्यैः संबंधाभिधेयप्रयोजनाधिकारिणो दर्शिताः श्रीराधामाधवयोः केलयोऽप्रतिपाद्यास्तत्र अभिधे
यप्रतिपाद्यप्रतिपादकभावः संबंधः ॥ तत्केलिनामनुमोदनजनितानंदरसविशेषास्वादः प्रयोजनं ॥ एतद्रसभावितांतःकरणो
धिकारी ॥ ३ ॥ २

CC0. In Public Domain, Digitizagtion by eGangotri

अथैतदादिदेशेऽप्यन्यत्र प्राकृतवर्णनप्रायतामालोक्यात्मनः प्रौढिमाविष्कुर्वन्नाह ॥ उमापतिधरनामा कविः वाचः पल्लवयति वि-
स्तारयति मात्रेण काव्यगुणयुक्ताः करोति ॥ शरणनामा कविर्दुरूहस्य दुर्बोधस्य काव्यस्य शीघ्ररचने श्लाघ्यः ॥ न तु प्रसादा-
दिगुणयुक्ते ॥ शृंगारस्योत्तरः श्रेष्ठो यत्र सत्प्रमेयो सामान्यनायकनायिकाप्रायवर्णने तस्य रचनैराचार्यगोवर्द्धनस्य स्प-
र्द्धी कोऽपि न ॥ न तु रसान्तरवर्णने ॥ धोयीनामा कविराजः श्रुतिधरः प्रसिद्धः श्रवणमात्रेण ग्रन्थादिधारी न तु स्वयं कवितया ॥

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते । शृंगा-
रोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥ ४ ॥

गिरां संदर्भः गुणालंकारादिग्रथनः विशेषः तस्य शुद्धिं शोधनं जयदेव एव जानाति । केवलं भगवद्गुणवर्णनात् । अथवा का-
कादैन्योक्तिरियं ॥ यथा गिरां संदर्भशुद्धिं किं जयदेव एव जानीते न जानीत एव । यत उमापतिधरः वाचः पल्लवयति नूतन-
यति ॥ शरणो दुरूहद्रुते श्लाघ्यः ॥ गोवर्द्धनाचार्यस्य तुल्यस्तु नास्त्येव ॥ धोयी कवीनां राजा श्रुतिधरश्च यद्यपि स्वयं दैन्येनै-
वमुक्तं तथापि सरस्वती पूर्वार्थमेव प्रमाणयति ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

अथ तत्केलीनां सर्वोत्कर्षप्रतिपादनायादौ श्रीगिनः शृंगाररसस्यांगभूतबिभत्सादिरसाधिष्ठातॄणां मत्स्याद्यवताराणां च रि
तवर्णनैर्मुख्यांगुज्वलरसाधिष्ठातुरवतारिणः श्रीकृष्णस्याखिलनायकशिरोरत्नतां प्रतिपादयिष्यन् सर्वोत्कर्षाविर्भाव
नं प्रार्थयते प्रलयेत्यादिभिर्वसंते वासंतीत्यंतैर्नः॥ हे केशव केशिदैत्यनिसूदन श्रीकृष्ण जय सर्वोत्कर्षमाविः कुरु तदाविःक
रणसामर्थ्ये हेतुः॥ हे जगदीश जगतां प्राकृताप्राकृतानामीशनशील॥ तथाविधत्वेपि कारुण्यमाह॥ हरति भक्तानामशे

मालवरागरूपकताले गीयते॥ प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्र
मखेदं॥ केशव धृतमीनशरीर जय जगदीश हरे॥ १ ॥ ॰ ॥ ॰ ॥

षक्लेशमिति हरिः हे तथाविध॥ तत्क्लेशहरत्वं तदेकप्रयोजनमात्रत्वेन प्रतिपादयन् रसामोदशाधिष्ठातॄनाह॥ तत्रादौ मी
नरूपेण तत्क्लेशहरणमाह॥ धृतमाविःकृतं मत्स्याकारं शरीरं येन हे तथाविध जय॥ जय जगदीश हरे इत्येव ध्रुवपदं॥
प्रतिपदमनुवर्तमानत्वात्॥ यथोक्तं॥ ध्रुवत्वाच्च ध्रुवः प्रोक्तः आभोगस्यांतिमो मत इति॥ मीनचरितमाह॥ प्रलयकालीनाये
समुद्रास्तेषामेकीभूते जले निमग्नं वेदमखेदं यथास्यात्तथा धृतवानसि॥ तत्प्रकारमाह॥ कृतं नौकायाश्चरित्रं येन तद्वि
त्यपि क्रियाविशेषणं॥ वेदरक्षणपूर्वकं प्रलयक्लेशात्सत्यव्रतमपादित्यर्थः॥ १॥ ४

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च ॥ कपटदैत्यादिनाप्याह ॥ हे धृतवामनरूप हे अद्भुतवामन विक्रमणे पदाक्रमणनिमित्तमुपादाय बलिं वंचयसि ॥ अद्भुतत्व
मेवाह ॥ पदनखनीरेण जनितं जनानां पावित्र्यं येन हे तादृश जय ॥५॥ न सकृन्मात्र परपीडया असकृत् परपीडया पीड्याह ।
हे धृतभृगुपतिरूप क्षत्रियाणां यद्रुधिरं तन्मये पयसि जले कुरुक्षेत्रस्थतीर्थे जगत्प्राणिमात्रमपगतपापं यथा स्यात्तथा त्वं स्नप
यसि ॥ कीदृशं तेन स्नपनेन शमितः संसारतापो यस्य ॥ तत्स्नानेन पापक्षयात् ॥ ज्ञानोत्पत्त्या भवतापशांतिरित्यर्थः ॥६॥

छलयसि विक्रमणे बलिमद्भुतवामन । पदनखनीरजनितजनपावन । केशव धृतवामन
रूप जय जगदीश हरे ॥५॥ क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमित
भवतापं । केशव धृतभृगुपतिरूप जय जगदीश हरे ॥६॥ वितरसि दिक्षु रणे दिक्प
तिकमनीयं । दशमुखमौलिबलिं रमणीयं । केशव धृतरामशरीर जय जगदीश हरे ॥७॥

१ तं

नैतावद्वनभ्रमणादिदुःखसहनेनाप्याह ॥ हे धृतरघुपतिरूप संग्रामे दशसु दिक्षु रावणस्य ये मस्तकास्तस्वरूपहारं द
दासि ॥ किमित्यपेक्षितत्वादिक्षु बलिदानं ॥ दिशांपतीनामिंद्रादीनाममीष्टं ॥ नैरपेक्ष्यं तद्बलिः कांक्षितं ॥ रमणीयं । परो
द्वेजकस्य रावणस्य मौलिबलिस्तेषां रतिजनक एवेत्यर्थः ॥७॥



Dr. Urmila Sharma Collection, Varanasi

नेतावन्मात्रं स्वप्रेयसीप्रमरूपक्लेशापनोदनायात्मनक्रयमुनाकर्षणादिनाप्याह ॥ हे धृतहलधररूप त्वं शुभ्रे वपुषि जलद-
वन्नीलं वसनं धारयसि ॥ तत्रोत्प्रेक्ष्यते ॥ हलेन हतिर्हननं तज्जीत्या मिलितायायमुनातद्वदाभा यस्य ॥ ८ ॥ किंच ॥ निजाज्ञा-
रूपवेदविरुद्धवादप्रवर्त्तनेनाप्याह ॥ त्वं यज्ञविधेर्यज्ञविधायकवेदवाक्यसमूहं निंदसीत्यहहेत्यद्भुतं ॥ स्वयं वेदारूप

वहसि वपुषि वि[श]देवसनं जलदाभं हलहतिभीतिमिलितयमुनाभं । केशव धृत-
हलधररूप जय जगदीश हरे ॥ ८ ॥ निंदसि यज्ञविधेरहह श्रुतिजातं सदय
हृदयदर्शितपशुघातं । केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥

काश्यपस्त्वयमेव निंदसीत्यद्भुतत्वं । तत्प्रकारमाह ॥ दर्शितः पशूनां घातो यत्र तद्यथा स्यात्तथा ॥ तदेव व्यनक्ति ॥ पशुषु स-
दयं हृदयं यस्य हे तादृश ॥ अहिंसा परमो धर्म इत्यादिदैत्यमोहनोय पशुषु दयासहि- तेत्यर्थः ॥ अहेः पयः पोषइव दै-
त्यानां यज्ञकरणमनुचितमिति तन्मोहनं बुद्धक्रमित्यर्थः ॥ ९ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

कैरु
युद्धधर्मं विना निर्दयतया प्राणिवधेनापीत्याह॥ हे धृतकल्किशरीर त्वं म्लेच्छनिवहस्य नाशनिमित्तं करवालं खड्गं कलिवल्मीः
कामधेनुतया कलयसि धारयसि॥ कीदृशं॥ किमप्यनिर्वचनीयमतिशयमित्यर्थः॥ करालं भयंकरं कमिव धूमकेतुमिव त्वन्मा
मायश्चौत्पातिकोग्रहस्तमिव॥ १०॥ एवं प्रत्येकं शृंगाररसाधिष्ठात्पुरस्कारेण निवेद्य समुदितं गिरसाधिष्ठात्पुरस्कारेण

म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालं। केशव धृतकल्किश
रीर जय जगदीश हरे॥ १०॥ श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं
भवसारं। केशव धृतदशविधरूप जय जगदीश हरे॥ ११॥

निवेदयति॥ हे धृतदशविधरूप श्रीकृष्ण जय जयदेवकवेर्ममेदमुदितं च शृणु॥ कीदृशं शुभदं जगन्मंगलप्रदं॥ यतो भवस्य
त्वदवताराणां जन्मनः सारमाविर्भावरहस्यं यत्र॥ अत एवोदारं परममहत्॥ ततः सुखदं परमानंदप्रदं॥ जन्मगुह्यमिद
मित्यादिश्रीसूक्तोक्तेः॥ ११॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवर्त्तमानशत्रुप्रत्यर्थेरवताराणांतत्तल्लीलानामपिनित्यत्वप्रतिपादनेनश्रीकृष्णस्यनित्यतत्तदवतारिलीलत्वंवक्तुमुक्त
गीतार्थमेकश्लोकेननिवध्नन्नाह ॥ दशावतारान्कुर्वतेश्रीकृष्णायसर्वाकर्षकानंदायतुभ्यंनमोस्तु ॥ दशाकृतिकृत्त्वंप्रकट
यन्नाह ॥ मीनरूपेणवेदोद्धारंकुर्वते ॥ कूर्मरूपेणभुवनानिवहते ॥ वराहरूपेणपृथिवीमंडलमुद्धरयते ॥ नृसिंहरूपे
णहिरण्यकशिपुंविदारयते ॥ वामनरूपेणवलिंछलेनात्मसात्कुर्वते ॥ परशुरामरूपेणदुष्टक्षत्रियाणांनाशंकुर्वते ॥

वेदानुद्धरतेजगंतिवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेवलिंछलयतेक्षत्रक्षयंकुर्वते । पौलस्त्यं
जयतेहलंकलयतेकारुण्यमातन्वतेम्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः ॥ ५ ॥१॥

श्रीरामरूपेणरावणंजयते ॥ वलभद्ररूपेणदुष्टदमनायहलंधारयते ॥ बुद्धरूपेणकारुण्यंविस्तारयते ॥ कल्किरूपेणम्ले
च्छान्नाशयते ॥ एतेषामवतारित्वेनश्रीकृष्णस्यसर्वरसाश्रयत्वंसिद्धं ॥ कृष्णानामदशनिर्गुणामित्याद्युक्तेः ॥ अतएवैकादश
भिःपदैःसमाप्तिः ॥ बुद्धोनारायणोपेंद्रोनृसिंहोनंदनंदनः ॥ बलःकूर्मस्तथाकल्कीराघवोभार्गवःकिरिः ॥ मीनइत्येषुक
थिताःक्रमाद्द्वादशदेवताइति ॥ भक्तिरसामृतसिंधौरसाधिष्ठातारः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



नै॰
अथैतैर्वश्रीकृष्णस्य सर्वनायकशिरोरत्नतां प्रतिपादनाय धीरोदात्तादिचतुर्विधनायकगुणसमन्वयेन सर्वोत्कर्षाविर्भा
वनं प्रार्थ्यते॥ श्रितकमलेत्यादिभिः॥ तत्र परमव्योमनाथत्वेन धीरललितत्वमाह॥ श्रितमाश्रितं लक्ष्म्याः कुचमंड
लं येन हे तादृश॥ अनेन विदग्धत्वपरिहासविशारदत्वप्रेयसीवशत्वनिश्चिंतत्वानि सूचितानि॥ अत एव धृते कुंडले येन
हे तादृश॥ धृता सुंदरी वनमाला येन॥ अनेन विशेषण द्वयेन नवतारुण्यत्वं॥ हे देव हे हरे जय॥ उत्कर्षमाविष्कुर्विति॥

गुर्जरीरागे मठताले॥ श्रितकमलाकुचमंडल धृतकुंडल कलितललितवनमाल
जयजयदेव हरे॥१॥ दिनमणिमंडलमंडन भवखंडन मुनिजनमानसहंस॥ २॥

सर्वत्र योजना॥ वीप्सा त्वादरेण॥ जयजयदेवहरे इति ध्रुवपदं॥ विदग्धो नवतारुण्यः परीहासविशारदः॥ निश्चिंतो धीरल
लितः स्यात्प्रायः प्रेयसीवशः इत्युपितत्रैव धीरललितलक्षणं॥१॥ अथ सूर्यमंडलांतर्ध्येयत्वेन धीरशांतत्वमाह। सूर्यमं
डलं पूज्यत्वोपपादनेन भूषयतीति हितत्वाविधजय॥ इति क्लेशसहनत्वे विनयादिगुणोपेतत्वं च। अत एव मुनिजनानां मानसे
हंस मानसे सरसि हंस इव सदा तत्र विनोदस्थितः इत्यर्थः। अनेन समप्रकृतिकत्वं। तेन तत्संसारं नाशयती तिता दृश इति विवेचकत्वं
। धीरशांतलक्षणं च तत्रैव॥ समः प्रकृतिकः क्लेशसहनश्च विवेचकः॥ विनयादिगुणोपेतो धीरशांत उदीर्यते इति॥ २॥ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्निजोपास्यत्वेपि ध्येय विशेषत्वेन धीरोद्धतत्वमाह॥ द्वाभ्यां॥ कालियनामा विषधरः सर्पस्तस्य गंजनेन जनान् विनाशयेत्येवं नंजन
इति ब्रजजनान् रंजतीति हे जनरंजन जय॥ किमिति तान् रंजयामि यदुकुलमेव नलिनं तस्य दिनेश सूर्य्य॥ यादवा नो हित्तार्थाय
धृतो गिरिवरो मयेत्यादि वचनाज्ञोपा एव यादवाः अतो गोपकुलप्रकाशी इत्यर्थः॥ कालियेति मात्सर्य्यवत्त्वं अहंकारित्वं च

कालियविषधरगंजनजनरंजनयदुकुलनलिनदिनेश ॥ ३ ॥
मधुमुरनरकविनाशनगरुडासनसुरकुलकेलिनिदान ॥ ४ ॥

धीरोद्धतलक्षणं॥ यथा॥ मात्सर्य्यवानहंकारी मायावी रोषणश्चलः॥ विकत्थनश्च विद्वद्भिर्धीरोद्धत उदाहृत इति॥
॥ ३॥ तस्यैव द्वारकायामुपास्यत्वेनाप्याह॥ मधुमुरनरकान् विनाशयतीति हे तथाविध जय॥ गरुडः पक्षिराजः स एवास
नं यस्य॥ सुरकुलकेलीनां निदानमादिकारणं एतैर्मायावित्वादि चतुष्कं॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सर्वतापशमनपूर्वकसर्वाभीष्टप्रदत्तया देवसहायकरूपेण धीरोदात्ततामाह। द्वाभ्यां निर्मलकमलदले इव लोचने यस्य हे तादृश ज
य ।। इति तादृशलोचनोपलक्षितगंभीरत्वे ।। सर्वतापशमकत्वमतआह ।। भवे संसारं मोचयंतीति तादृश इति करुणत्वे ।। तद
पि कुतस्त्रिभुवने.. भवनं येषां तेषां प्राणिनां निधानं ।। निधिवत्परमप्रिये त्यर्थः ।। इति विनयित्वे धीरोदात्तलक्षणे । गंभीरो
विनयी क्षंता करुणः सुदृढव्रतः । अकत्थनो गूढगर्वो धीरोदात्तसुसत्वभृदिति ।।५।। जनकसुतया कृतं भूषणं यस्य हे तादृ

अमलकमलदललोचन भवमोचन त्रिभुवनभवननिधान ।। ५ ।। जनकसुताकृतभूषण जित
दूषण शमर शमितदशकंठ ।। ६ ।। अभिनवजलधरसुंदर धृतमंदर श्रीमुखचंद्रचकोर ।। ७ ।।

श तनय इति सुदृढव्रतत्वे। जितो दूषणनामा राक्षसो येन । संग्रामे शमितो रावणो येन ।। इति क्षोत्व गूढगर्वत्व सुसत्वभृत्वाक्य
न्यानि ।। ६ ।। अस्मिन् धीरललितप्रख्यता प्रतिपादनाया जितरूपत्वेन संघटितमिव पुनस्तमेवाह ।। हे नवीनघनवत्सुंदर सैत्वनाम
गिरिर्येन ।। क्षीराब्धिमथने इत्याधिगंतव्ये ।। श्रियः समुद्रमथनाविर्भूताया मुखचंद्रे चकोर इव सलालस इति प्रेयसीवसत्वे ।। एते
केषु चित् . णाअंशेन ।। श्रीकृत्से सर्वस्वपूर्णतया विराजत इति सर्वोत्कर्षत्वं ।। अतोत्रापि नवपदैः समाप्तिः ।। ७ ।। ।

केचित्तु १ जयधृतमंदर २



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ स्वसहितेष्वेतच्छ्लोकं तत्कृपाप्रसादं प्रार्थयते ॥ हे श्रीकृष्ण तव चरणे वयं प्रणताः इति भावय जानीहि ॥ ज्ञात्वा किं कर्तव्यं ॥ प्रण
तेष्वस्मासु कुशलं तल्लीलानुभवसामर्थ्यं कुरु देहि ॥ त्वल्लीलानुभवस्य त्वत्प्रसादं विनानुपपत्तेः परमानंदरूपत्वादित्यर्थः ॥
८ ॥ तत्र स्वानुभवं प्रमाणयति ॥ इदं जयदेवकवेर्मम मुदं करोति ॥ इदमिति किं ॥ मंगलं मंगलाचरणमात्रं ॥ तत्र हेतुः ॥
उज्ज्वलस्य रसस्य गीतिर्गानं यत्र ॥ एवं चेत्किमुत केलीनामित्यर्थः ॥ ९ ॥ एवमुभयप्राधान्येनाद्ये मंगलमाचर्य स्वस्परा

तव चरणे प्रणता वयमिति भावय कुरु कुशलं प्रणतेषु ॥ ८ ॥ श्रीजयदेवकवेरिदं कुरुते मुदं मंगलमु
ज्ज्वलगीति ॥ ९ ॥ पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य ॥ व्यक्तानुरागमिव खेलद
नंगखेदस्वेदांबुपूरमनुपूरयतु प्रियं वः ॥ १० ॥

पिद्वैकाश्रयतया तत्सौभाग्यवर्णनेन मध्येऽपि मंगलमाचरति ॥
मधुसूदनस्य वक्षो माणरीत्या श्रीकृष्णस्योरः वो युष्माकं वांछितमनु निरंतरं पूरयतु ॥ कीदृशं ॥ पद्मा श्रीराधा तस्याः पयोधरप्रांत
भागपरिरंभलग्नकुंकुमेनांकिते ॥ मुद्रां प्रापितमित्यर्थः ॥ अत्रान्यामावविशंत्वित्यभिप्रायेणैवेति भावः ॥ अतएव खेलतानंगे
नयः खेदस्तेन स्वेदांबूनां पूरः प्रवाहो यत्र तत्रोत्प्रेक्षते । व्यक्तः प्रकटीभूतोऽनुरागो यत्र तदिव ॥ अंतरुच्छलितः प्रियानुरागोऽभ्यंतरे
समावेशाभावाद्बहिः काश्मीररूपेणोरस्याविर्भूत इत्यर्थः ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



काकुलां ५

तदेवं केलिवर्णनोपयुक्तनायकगुणप्रतिपादनपुरःसरमंगलसंगमनेनैव माधवोत्कर्षमाविष्कृत्योपक्रमोक्तश्रीराधामाध
वरहः केलिवर्णनोच्छलितचित्तः कवि सूचीकटाहन्यायेन श्रीशुकवत्साधारणेनान्याभिलषितहरणं समासेन समापयितु काम
स्तेनैव श्रीराधिकायाः सर्वोत्कर्षमाविःकर्तुं तत्रतस्याः अष्टनायिकावस्थावर्णयन्संभोगपोषकविप्रलंभशृंगारवर्णना
यप्रथमं विरहोत्कंठितावस्थामाह ॥ उत्कंठितालक्षणं ॥ यथा ॥ उद्यमममन्मथमहाज्वरवेपमानो रोमांचकंचुकितमं
गमलेवहंती ॥ संमोहवेपथुघनोत्पुलकं ... गीमुत्कंठितां वदति तां भरतः कवींद्र इति ॥ वसंतसमये सहचरति न क्वापि

वसंते दासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे वहुविहितकृष्णानुसरणां ॥१॥

कार्यार्थे हीयत इति सहचर्यस्तां तद्विश्वासभूमिः ॥ श्रीराधां सरसंस्त्राश्वासहेतुभूतमपि उत्कंठातिरेकजनकगूढाभिप्राय
मिदमूचे ॥ श्रीकृष्णाभिप्रायं ज्ञापयितुमिति ज्ञेयं ॥ तत्र हेतुः ॥ माधवीपुष्पतोपि कोमलैरंगैरुपलक्षितापि । विरहतापस
हनाशक्त्या यत्र यत्र नीयते किंचित्सा दृश्यदर्शनार्थं तत्र तत्र दुर्गमे वर्त्मनि भ्रमंती ॥ ततोपि कथं नीयते ॥ क्वचिदपि स्थानुमशकु
वत्मा वहुप्रकारे कृते कृष्णान्वेषणं यथा ॥ कृष्णान्वेषणायेत्यर्थः ॥ तदपि कथं करोति ॥

६

Dr. Urmila Sharma Collection, Varanasi

अमंदं यथा स्यात्तथा कंदर्पेण कामेन तत्प्राप्त्यभिलाषेण यो ज्वरस्तेन जनिताया चिंतानानोपायविचारस्तया आकुलतया वलंती पीडायस्य
स्तां॥ अत्र तां विनान्याभिः सह श्रीकृष्णकौतुकरास विरुद्धविहरणेनेदं गम्यते॥ शारदीयराकारात्रौ प्रथमरासमहोत्सवे श्रीराधिकाय
ः असमानोर्ध्वरूपगुणविलासाननुभूय तस्यां सर्वं विजयित्वानुरागं सफलं मन्यमानस्य श्रीकृष्णस्य कुत्रचित् कथंचित् तत्साह
र्थ्यं स्यात् अत्र देति स्थूणानिखननन्यायेन तत्सायामत्युत्कुतायां हि नकतिपयानंतरं तस्यामानिन्या आगमनोपायालीलेयमिति॥१॥
किमूचे तत्राह॥ हे सखि इह वृंदावनविपिने रसः शृंगारस्तेन सह वर्त्तमाने तदुद्दीपक इत्यर्थः॥ वसंतसमये हरिर्विहरति केन त्र

अमंदकंदर्पज्वरजनितचिंताकुलतयावलद्बाधां राधां सरसमिदमूचे सहचरी॥१॥ वसंतरागे यतिताले॥
ललितलवंगलतापरिशीलनकोमलमलयशमीरे॥ मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे॥
॥१॥ विहरति हरिरिह सरसवसंते॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते॥ ध्रु॥ ॥ ॥

कारेण॥ युवतिजनेन समं नृत्यति॥ युवतिजनप्राधान्योक्त्या स्वार्थेऽपि मप्राधान्यमेव व्यज्यते कीदृशे॥ विरहिजनस्य दुरंते दुःखेन ग
मयितुं शक्ये॥ हरिर्मनोहरणशीलः॥ अतोस्य विरहो दुःसहः॥ सरसोपि वसंतो ये विरहिणस्तान् दुःखदत्वाद्दुरंत इत्यर्थः॥ श्रीकृष्णाभि
प्रायज्ञानात्तस्याभावी विरहनिवारणार्थमिदमुक्तं॥ ध्रु॥ कथं दुरंते ति वासे ति कथयन्नाह॥ ललितायाः लवंगलतायाः परिशील
नेन स्वयं आलिंगनेन कोमलो मलयसंबंधी समीरो यत्र॥ अचेतनापि लता कांतमंतरेण चेत् स्थातुं न शक्नोति तर्हि चेतनानां का कथे
त्यर्थः॥

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

१०

नकेवलमिदमन्यदपि॥ मधुकराणां समूहेन करंबितानां मिश्रितानां कोकिलानां कूजितं यत्र स कुंजकुटीरो यत्र॥ श्रीराधिकोत्कंठायाः
वसंत विशेषणद्वारा वृन्दावनार्थमित्युक्तिः॥१॥ विरहिणां दुरंतश्चेत् प्रोषितभर्तृकानां किं वक्तव्यमित्याह॥ उन्मत्तो मदो यस्य त
स्मिन्मदनेन मनोरथो येषां ते ये पथिकवधूजनास्तैर्जनितो विलापो येन॥ न चैतावतापि विरमति॥ अलिकुलेन संकुलेन व्या
प्तेन कुसुमसमूहेन निःशेषेणाकुलो बकुलकलापो यत्र॥२॥ आस्तां स्त्रीणां वार्ता यूनामपि। कस्तूरिकायाः सुगंधस्य योरभ

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे। अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकला
पे॥२॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले। युवजनहृदयविदारणमनसिजनखरुचिकिंशु
कजाले॥३॥ मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकाशे। मिलितशिलीमुखपाटलिपटलकृतस्मरतूण
विलासे॥४॥

तथा युवजनानां हृदयविदारणा मनसिजस्य
सः अतिशयस्तस्यायत्तानवदलानां श्रेणी येषु तेन तमाला यत्र। तथा युवजनानां हृदयविदारणा मनसिजस्य
तद्वक्रा नखास्तद्वद्रुचिर्येषां पलासकुसुमानां तेषां समूहो यत्र। स्त्रीषु किंचित्सदयो युवघ्नतीव निर्दय इति भावः॥३॥ म
तस्य कथमीदृशमघटनघटनासामर्थ्यं॥ मदनमहीपतेः सुवर्णछत्रस्येव रुचिर्यस्य तस्य नागकेशरकुसुमस्य विकाशो यत्र॥ नके
वलंबते। किंच। मिलिताः शिलीमुखा भ्रमरा यस्मिन् तेन पाटलिपुष्पसमूहेन कृतः कामतूणीरस्य विलासो यत्र। अनेन तत्सामर्थ्यमव
जितं॥४॥ १०

CC0. In Public Domain, Digitizagtion by eGangotri

मे
नदाश्चर्यकृत्संबाहा। विगलितं लज्जितं पुनः पुनः संत्रियमाणमप्यस्थिरं लज्जितं लज्जायस्मात्तस्य जगतः प्राणिमात्रस्यावलोकनेन
तरुणैः करुणस्कंधैः पुष्पव्याजेन कृतो हासो यत्र। तथा स्वविशेषलाभेनाप्युत्साधिको त्साहो भूदित्याह॥ विरहिणां निकृंतन
नाय छेदनाय कुंतस्यास्त्र विशेषस्य मुखमिवाकृतिर्यासां ताभिः केतकीभिर्दंतुरिता आशा दिशो यत्र॥ अनेनाति निर्दयतासू
चिता॥५॥ तद्गुणोपि परोद्वेजक इत्याह॥ माधविकायाः परिमलेन ललिते। तथा नवमालिकयातिसौरभे॥ मुनिमनसा

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे। विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे॥
माधविकापरिमलललितेनवमालिकयातिसुगंधौ॥ मुनिमनसामपिमोहनकारिणितरुणाका
॥५॥ माधविकापरिमलललितेनवमालिकयातिसुगंधौ॥ मुनिमनसामपिमोहनकारिणितरुणाका
रणबंधौ॥६॥ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते॥ वृंदावनविपिनपरिसरपरिगत यमुनाजलपूते॥७॥

मपि मोहजनके॥ ईदृशो विधः सामाधिप्रुक्तमुनीनां मनस्युद्वेजकः स कथं चिरं तिष्ठति॥
तरुणानां तु मानिनीमानभंजनतयानिरुपाधिकमित्रे तदाशीर्वदिन चिरं तिष्ठतीत्यर्थः॥६॥ एवं सामान्यतो वसंत निरूपणे
न राधां प्रति स्त्री कल्प कृतवसंत क्रीडादर्शन मात्रेण न मानः कार्यः किंतु विचार्यैवेति सूचयित्वा विशेषतो वसंतरामणीय
कमाह। माधविलतायाः परिरंभणेन पुलकितइव मुकुलितः आम्रतरुर्यत्र। यथा कश्चिद्वरांगनालिंगितः पुलकितो भवतीत्य
र्थः। तथा समीपव्याप्तयमुनाजलेन पूते शोभित इत्यर्थः। अतोत्र प्रियानुसरणमेवोचितं नमान इति ध्वनिः॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

अथप्रकृतोपयोगंवदन्श्रेष्ठत्वात्प्रवृत्तमर्थंस्त्वभणितेरुत्कर्षमाह ॥श्रीजयदेवस्येदंभणितमुदयतिविराजते।कुतः।ह
रिचरणयोःस्मरणेनसारंसर्वतःश्रेष्ठं।तत्रापिरसःशृंगारस्तत्पोषकवसंतसमयसंबंधिनोवनस्यवर्णनंयत्र।अतएव
सन्निधानवर्त्तीश्रृणुवत्यास्तस्यामदनविकारोयत्र।आद्येस्त्वभणितेरुत्कर्षः॥द्वितीयेवसंतातिशायिता।तृतीयेप्रकृ
तोपयोगः॥ पुनरुद्दीपनायाद्यपद्योक्तानिलस्यसंतापकत्वंविशेषतोवर्णयति।इहवसंतसमयेवायुश्चेतोदहति।विर

श्रीजयदेवभणितमिदमुदयतिहरिचरणस्मृतिसारं।सरसवसंतसमयवनवर्णनमनुगतम
दनविकारं॥८॥दरविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि।इह
हिदहतिचेतःकेतकीगंधबंधुःप्रसरदसमबाणप्राणवद्गंधवाहः॥८॥ । ॥ ।

हिणामित्यर्थः।किमपराद्धमेतैस्तस्ययदेषांचेतोदहति।प्रतिदिशंसंचरन्तःकामस्यप्राणतुल्यःकामसखइत्यर्थः।कामे
नृपत्वेनोक्तस्तत्सखावायुःसखुराज्ञापालनंविरहि नालोच्यतच्चेतोदहतीत्यर्थः।किंकुर्वन्।ईषद्विकशितायामल्लिका
लतायाःसकाशादुच्छलद्भिःपुष्पपरागैरेवप्रकटितपटवासैःसुगंधचूर्णैःकाननानिसुरभीणिकुर्वन्।तत्र पिहेतुः।केत
कीगंधस्यसहचरी॥केतकीमालि मल्लीमुपसर्पन्तत्परागग्राहितिसंततश्चान्यचेतोदहतीत्यर्थः॥८॥ ११

CC0. In Public Domain, Digitizagtion by eGangotri

धुनरतिशयेनोत्प्रेक्ष्यते। मलयाचलसंबंधीवायुरद्यमहेशाचलं हिमालयमनुसरतिकिमर्थं। हिमावगाहनेच्छया। नदीक्षा
पिकुतः। मलयक्रोडे वसतां सर्पाणां कवलेनयः क्लेशस्तस्माद्दिवोत्प्रेक्षते। चंदनकोटरस्थाहिकवलसंतप्तो हिमस्नानेच्छयाहि
मालयंयातीत्यर्थः। नकेवलंवायुरेवङःसहोन्योपीत्याह। किंचेति। स्निग्धाम्रवृक्षाणामग्रभागेषु कुलान्यालोक्यहर्षोदया
त्कुहूः कुहूरिति पिकानांगिरउच्छंति॥ कीदृश्यः॥ मधुरास्फुटध्वनिनोद्गताः॥ ९॥ विरहिणामत्रदिवसनिर्यापणेड

ला१

अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलंप्रालेयप्लवनेच्छयानुसरति श्रीखंडशैलानिलः॥ किं च स्निग्ध
रसालमौलिमुकुलान्यालोक्यहर्षोदयादुन्मीलंतिकुहूःकुहूरितिकलोत्तानाः पिकानांगिरः॥ ९॥ उन्मीलन्मधु
गंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः नीयंते पथिकैः कथं
कथमपिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः॥ १०॥ ॥ ॥ ॥

मधूनि१

ःशकमित्याह॥ पथिकैरमीवसंतसंबंधिनो वासराअतिकष्टेनातिवाह्यंते। तत्रहेतुः। उन्मीलंतियानिगंधाश्चतेषुलुब्धैर्मधुपैःकंपि
तेष्वाम्रमुकुलेषु क्रीडतां कोकिलानांसूक्ष्मकलैर्यैःकोलाहलास्तैरुद्भूतःकर्णज्वरोयेषु। कैर्नीयंते। ध्यानेप्राणसमायाश्चिंतनेयोव
धानस्तेनप्राप्तायाः प्राणसदृशप्रियतमायाःयःसमागमरसस्तस्मादुत्पन्नायेउल्लासास्तैः॥ १०॥ ॥ ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



मंद १

एवं वसंतेमारुतादीनां उद्दीपकत्वापादनेन कृष्णमिलनातिरिक्तोपायानिवर्त्यतां विरहव्यथायानिरूप्य तत्कृतवसंतक्रीडा
भिप्रायमननुसंधानायायदितेन प्रतीतित्तर्हित्विमेवं तर्हितालोकयेत्याह ॥ असौमेधे रित्याद्युक्तवाक्यासखीराधिकांपुनराह
। किंकुर्वती । तामाराच्चिकरमानीय मुरारिं प्रत्यक्षं दर्शयंती । कथमनभीष्टमन्यांगनारमणं दर्शयति अनेकनारीणांपरिरं
भेयः संभ्रमस्तेन स्फुरत् सुहृदयंगमेषु श्रीराधाविलासेषु लाल सौत्सुक्यं यस्य ॥ एतद्विलासस्य प्रत्यक्षत्वात्तस्याविलास
स्येवस्फुरणंप्रयुक्तमित्यर्थः ॥२१॥ किमाहेत्याह । हे विलासिनि कृष्णमनोनुरंजका समामोर्द्ध विलासशीले । इहवृंदावने

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं । मुरारिमाराडुपदर्शयंत्यसौसखीसमक्षंपुनरा
हराधिकां ॥२१॥ रामक्रिरागेयतिताले ॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली । केलिचलन्मणि
कुंडलमंडितगंडयुगस्मितशाली ॥२२॥ हरिरिहमुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥ ध्रु ॥
स्ता १

मुग्धे स्वाभिप्रायानभिज्ञे वधूनिकरे हरिर्विलसति त्वद्विलाससादृश्याभासं कामयते । त्वदागमनेच । कथं विदग्धोसि न जानेति
॥ केलिपरे ॥ कृष्णस्यदाक्षिण्येचेष्टाविघृतयातदनुसंधातुमशक्तेः ॥ ध्रुं ॥ कृष्णस्यतच्चित्ततामेव व्यनक्ति । चंदनेनानुलिप्तेनील
कलेवरे पीतवसने वनमालां च विद्यते यस्य । त्वद्विरहसंतापोपशमकचंदनाद्भ्रमालाः त्वद्वर्णवसनैर्भूषितो विलसतीत्यर्थः ॥
पुनरुद्दीपनायसहजाभिरूप्यमाह ॥ केलिषु चलन्त्यां मंडितेन गंडयुगेन स्मितेन च शोभमानः ॥ १ ॥ ॥ ३: ३ ११

मणिकुंडलाभ्यां १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तस्मौग्ध्यमेवव्यनक्ति। समुचितविचारानभिज्ञा काचित् गोपवधूर्निविडस्तनभारातिशयेन त्वदुत्कर्षविनोदार्थिनं हरिं परिरभ्य तमनुगायति। कीदृशं। तेऽन्नीत पंचमस्तन्नामुद्राङ्कितपंचमस्वरप्रेक्तो रागो येन तं। पुनः कीदृशं। सरागं त्वदनुरागेण सहवर्त्तमानं ॥२॥ अन्यातु मुग्धवधूस्त्वेहक्चेष्टानभिज्ञा मधुसूदनवदनसरोजमधिकं यथास्यात्तथाध्यायति ॥ भ्रमरवद्रसविशेषान्वेषणपर इति श्लिष्टमधुसूदनपदोपन्यासः। कीदृशं विलासिनचंचलयोर्विलोचनयोः खेलनेन जनितलासं मनोज्ञं

पीनपयोधरभारभरेण हरिं परिरम्य सरागं। गोपवधूरनुगायति काचिदुदंचितपंचमरागं ॥२॥ कापि विलासविलोलविलोचनखेलनजनितमनोजं। ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं ॥३॥ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले। चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ॥४॥ केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले। मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले ॥५॥

येन। त्वद्विलासस्फूर्त्योल्लसितमित्यर्थः ॥३॥ कापि नितंबवती किंचिद्रहस्यकथनव्याजेन श्रुतिमूले मिलिता सती कपोलतले चारु यथास्यात्तथा चुचुंब। कीदृशे। पुलकैरनुकूले त्वदभिलाषसूचके ॥४॥ काचिदङ्गपांगनाऽमुं त्वद्विलासस्फूर्त्या त्वया सह क्रीडनाय ततो निर्गत्य यमुनातटमनोहरवेतसीकुंजे गतं तत्स्फूर्तिसुखावेशेन स्थितं श्रीकृष्णं केलिकलाकुतुकेन नर्त्तनादिकौशलहेतुना करेण दुकूलेऽवाकृष्टवती ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



रासरसेसहनृत्यपरायुवतिः हरिणाप्रशशंसे। किंचित्वंनृत्यसादृष्यात्स्तुतेत्यर्थः॥ कीदृशी। करतलतालैस्तरलवलयावलीमिलत्व
त्समनैर्मिलितःकलस्वनवेशोयत्र। करतालवलयध्वनियुतवंशनादसंकुलइत्यर्थः॥६॥ श्लिष्यतीत्यादिमुनात्याशक्तिर्ध्वनिता॥
एकस्यांसर्वागारंभाभावात्। सश्रीकृष्णः स्मितचारुयथास्यात्तथापरांपश्यति॥ अपरांवामांत्वत्नामग्रहणालापजकोपचलिता
मनुनयेनप्रसादयति॥७॥ श्रीजयदेवभणितमिदंशुभानिवितनोतु। कीदृशं। अद्भुतंकेशवस्यकेलिरहस्यंवैदग्धीविशेषेण
श्रीराधाविलासपरीक्षणरूपंयत्र॥ तथावनविहारसौष्ठवयुतंयशसान्वितंच॥च॥ पुनरुद्दीपनायत्वन्निमित्तेतद्विलास

करतलतालतरलवलयावलिकलितकलस्वनवंशे। रासरसेसहनृत्यपराहरिणायुवतिःप्रशशंसे॥६॥ श्लि
ष्यतिकामपिचुंबतिकामपिकामपिरमयतिरामां। पश्यतिसस्मितचारुपरामपरामनुगच्छतिवामां॥७॥ श्रीजय
देवभणितमिदमद्भुतकेशवकेलिरहस्यं। विपिनविनोदकलावलितंवितनोतुशुभानियशस्यं॥८॥ विश्वेषाम
नुरंजनेनजनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं॥

व्यापारेष्वपित्वद्विलासाविष्टस्वायमित्याह॥ हेसखिमधौमुग्धस्त्वच्चित्ततयाकर्तव्याकर्तव्यविचारशून्योहरिःक्रीडति। कथंवद्भुनायिका
रमणस्येहकृत्वे॥ विश्वेषांसर्वगोपांगनाजनानामनुरंजनेनतस्यसर्वाङ्गरंजकत्वाच्छिप्रपस्वभावेनतेषांस्वस्त्वांछातिरिक्तरसदानात्प्री
णनेनानंदंजनयन्॥ः छिप्पमेवविहरतीतिअनंगोत्सवमाधिक्येनप्रापयन्॥ कीदृशैः। नीलकमलश्रेणीतोविश्यामलकोमलैः॥

नद्व१



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामलशब्देन सुंदरत्वं १

इंदीवरशब्देन शीतलत्वं ॥ श्रेणीशब्देन नवनवायमानत्वं कोमलशब्देन सुकुमारत्वं च सूचितं ॥ ननु द्वित्रिकोटिस्थयोर्येरसंज्ञायकानुरागे सत्यपि नायिकानुरागमंतरेण कथं तदुदयः तत्राह ॥ व्रजसुंदरीभिरालिंगितः स्वस्वप्रेमानुरूपालिंगनाद्यनुरंजनेनानुरंजितः ॥ अनुरागं प्रापित इत्यर्थः ॥ अनेनान्योन्यानुरंजनतात्पर्यतया प्रेमपरीपाकोद्गत पूर्णरसाविर्भावेन प्राकृतरसस्तिरस्कृत इति

स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥ ११ ॥

ननु १

सूचितः तस्यैव तत्पोषः सर्वांगीरसो न स्यात् ॥ न । स्वच्छंदं यथा स्यात्तथा । कालदेशक्रियानामशंकोचादित्यर्थः । तथापि तस्य सर्वांगता न स्यात् ॥ न । अभितः । सर्वैरंगैरित्यर्थः ॥ तथाप्यंगानां दिङ्मात्रता स्यात् । न । प्रत्यंगं । एकैकांगस्य यथोचितक्रियये त्यर्थः ॥ नन्वेकेनानेकेषां समाधाने कथं स्यात्तत्राह । शृंगाररस एव मूर्त्तिमानित्युत्प्रेक्षा । सोपि कएव विश्व मनुरंजयन्नानंदयतीति ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अथसखीव चनश्रवणोद्भूततत्कालिकायाःश्रीराधायाःशारदीयरासाचरितस्फूर्त्तिंस्मरन्कविराशिषंप्रयुंक्ते॥ हरिर्वोयुष्मान्र
क्षतु। कीदृशः। [illegible] आभीरवामभ्रुवांगोपसुंदरीणांसमीपेश्रीराधयाउद्भटंयथास्यात्तथाउरःपरिरभ्यचुं
बितः। लज्जाशीलायास्तत्रतत्सिद्धिःकथं॥ ततःतेचतास्त्वविशिनष्टि॥ प्रेमान्धयाप्रेमाविशविगलितलज्जयाऽतआपिवैदग्धी
मनन्ति। किंकृत्वा॥ त्वद्वदनेसाधुरमणीयंसुधामयंविविधभाववंधुरेणानेनप्रस्तुतालापगानेनानंदयसि मन्मानसमिति

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया॥ साधुत्वद्वदनंसु
धामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः॥१२॥ इतिश्रीगीतगोविं
देसामोददामोदरोनामप्रथमःसर्गः॥ ॥ १ ॥ ॥ ॥

साऽनुरागमभिधायगीतस्तुतिव्याजंविधाय॥ अतस्तद्वैदग्धीदिग्धपरिरंभादिसौभाग्यलाभानंदजस्मितेनतस्यामनोहरणशील
ः॥ कीदृशीनां॥ रासोल्लासभरेणविभ्रमभृतां॥१३॥ अतएवसर्गोयंश्रीराधाविलासानुभवेन सम्यक्मोदेनसहवर्त्तमानोऽत्र
मोदरोयत्रसइतिसर्गः॥ ० ॥ इतिश्रीचैतन्यदासकृतायांबालबोधिन्यांगीतगोविंदटीकायांप्रथमःसर्गःसमाप्तः॥ १॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तविलासंहरिंपश्यदपिममनः सुलभदुर्लभविवेकचतुरंहरिं ४
कर

अथश्रीकृष्णस्यसाधारणविहरणंनिश्चित्येर्षोदयात्तद्दर्शनमप्यसहमानान्यत्रगतेत्याह॥कृष्णेत्वसंनिधानेविहरतिसतिविगलित
निजोत्कर्षात्स्वस्मिन्नप्यसाधारणतयोत्कर्षापकर्षसंभाव्येर्षावशादन्यतोगताराधाक्वचिदपिमदनवलोकितचरेलताकुंजे
लीनातत्क्षणमेवतद्दर्शनेनदीनासतीसखींप्रतिरहोसेतगोप्यमपित्वाचा॥तात्कालिकेदैन्येहेतुः॥गुंजन्मधुव्रतमंडलीमु
खरशिखरे।विरहोद्दीपकेऽस्मिन्नवस्थानंतत्रस्थातुंनततोन्यत्रगंतुंचाशक्यादैन्यमित्यर्थः॥१॥ किमुवाच॥हेसखिइहविशि

विहरतिवनेराधासाधारणप्रणयेहरौविगलितनिजोत्कर्षादीर्षावशेनगतान्यतः।क्वचिदपिलताकुंजेगुंज
न्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्युवाचरहःसखीं॥१॥गुर्जरीरागेयतिताले॥संचरदधरसुधा
मधुरध्वनिमुखरितमोहनवंशे।वलितदृगंचलचंचलमौलिकपोलविलोलवतंसे॥१॥रासेहरिमिहविहि
तविलासं।स्मरतिमनोममकृतपरिहासं॥ध्रुवं॥ तविलासंहरिंपश्यदपिममनःसुलभदुर्लभविवेकचतुरंहरिं
मनोहरंस्मरति॥पूर्वानुभूतमेवानुसंधत्ते॥कीदृशं॥रासेशारदीयेकृतःस्कंधमारुह्यतामितिपरिहासोयेन॥
अमुमेवतंवयथोयुक्तकारिणमित्यर्थः॥ध्रुवं॥तान्विलासानेवाह।संचरंत्याअधरसुधयामधुरेणध्वनिनावादितोमो
हनवंशोयेन।तादृशीमनोहरवंशीध्वनिरप्यत्रनास्तीत्यर्थः।सर्वत्रैवंयोज्यं।तन्मोहनत्वेव्यनक्ति।वंशीवादनेवलितेआयतेदृगंच
लेयस्य।चंचलोमौलिर्यस्य कपोलेविलोलौवतंसौकर्णभूषणेयस्यसचसचसचतं॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तत्कालीनकेशवेषमाह॥ चंद्रकेनार्द्धचंद्राकारेण चारूणां मयूरपुच्छानां मंडलेन वेष्टितः केशो यस्य। तदेवोत्प्रेक्षते वृहदिंद्रधनु
र्भिरिजितस्त्रिवितो योमेघस्तद्वत्शोभनो वेशो यस्य॥ आलोसर्वांगीनाभिरूप्यं तत्केशवेषमपि मन्मनोन विस्मरतीति भावः॥ २॥ अ
धरसौभाग्यमाह॥ गोपस्त्रीणां मुखचुंबनेन लंभितः प्रापितो लोभो यस्य॥ तां विहायान्यत्र मन्नयनात् मयीति शेषः। कीदृशं॥
बंधुकपुष्पवदरुणो मधुरश्चाधरपल्लवो यस्य। तत्र विकासितेन स्मितेन शोभा यस्य। गोपीकदंबकृतस्वमुखचुंबनोद्धस्मन्मु
खचुंबनस्पृहयोल्लासेन स्मितमित्यर्थः॥ ३॥ स्वस्यासाधारणसौभाग्यं व्यंजयंती अन्यासु तद्बाहुक्षिप्तव्यापारमाह॥ विस्तीर्ण:

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं। प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥ गोपक
दंबनितंबवतीमुखचुंबनलंभितलोभं। बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं॥३॥ विपुलपुलकभुज
पल्लववलयितवल्लवयुवतिसहस्रं। करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रं॥४॥ जलदपटल
वलदिंदुविनिंदकचंदनतिलकललाटं। पीनपयोधरपरिसरमर्द्दननिर्द्दयहृदयकपाटं॥५॥ ॥ ॥

पुलकोपयोस्ताभ्यां भुजाभ्यां वलयवद्वेष्टितं वल्लवयुवतीनां सहस्रं येन। एकदानेका लिंगनान्नेकनिष्ठप्रेमेत्यर्थः॥ तथा। क
रचरणोरसि स्थिता ये मणिगणोपलक्षिता नियाभिभूषणानि तेषां किरणैर्नाशितो ऽधकारो येन। नतु राकेंडना॥ ४॥ अत्रत्यव्यापा
रमनुद्यन तत्कालीनो रमणीयतामाह॥ जलदसमूहे चंद्रिंदोः शोभातिशायी चंदनतिलको ललाटे यस्य। तथा पीनपयोधरयोः
पर्यंतभागस्य मर्द्दने निर्द्दये हृदयकवाटं यस्य॥ हृदयस्य कवाटत्वेनोक्तिर्दृढत्वविस्तीर्णत्वबोधिका॥ ५॥ ॥ ॥ १५



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मी२ कुंडलाभ्यां१

तद्रमणीयत्तोसर्वचिन्ताकर्षणेनकर्षणद्रढयति। मणिप्रचुराभ्यांमकराकाराभ्यांमंडितौगंडौयस्य॥ अतएवोदारं। तथापीतंवसनेयस्य॥ तत्रमयाचछद्रोछिततनेतत्सर्वं पूरितवानतः सकथंनसमर्थ्यतइति ध्वनिः॥ औदार्य्यमेवव्यनक्ति। अनुगताः स्वसौंदर्य्येणकृष्टाः मुन्यादीनांवरपरिवाराःपरिग्रहायत्र ॥६॥ एतद्दर्शनावेशस्फूर्त्याह॥ विशदकदंवतलेमिलितं। ततश्चमांविनाकृतवंतंकेल्यपराधजातकलहक्लेशाद्यशयंतच्चाटुभिरपनयंतं॥ अथकिमप्यनिर्वचनीयंयथास्यात्तथा मामेवरमयंतं। ततश्च

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं। पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं॥६॥
विशदकदंवतलेमिलितंकलिकलुषभयंशमयंतं। मामपिकिमपितरंगदनंगदृशामनसारमयंतं॥७॥
श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं। हरिचरणस्मरणंप्रतिसंप्रतिपुण्यवतामनुरूपं॥८॥

कारमाह॥ तरंगद्वाचरन्ननंगोयत्रतयादृशा मनसाच। तारमयन्नपिमयासहरतिंध्यायंतमित्यर्थः॥७॥ श्रीजयदेवभणितमिदंपुण्यवतांभगवद्भक्तिविशिष्टवतांहरिचरणस्मरणंप्रतीदानीमपियोग्यंतादृशभावेनास्वादनीयमित्यर्थः। तत्रहेतुः। अतिशयेनसुंदरंमोहनंचमधुरिपोरूपंयत्र॥८॥

प्रतिसं२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri





ननु श्रीकृष्णस्त्वां विहायान्याभिः स्त्रीभिर्विहरति तर्हि त्वं किमिति तं स्मरसीत्यत आह ॥ मम वामं मनः पुनरपि कृष्णे कामाभिलाषं करोति
अहं किं करोमि। अथ मे निरपराधे दयिते ऽरभिमानं मा प्रापय्येदानीं निजाकर्षणनिपुणे कृष्णं कामयते। इति वामता। निरपराध
ता कुतः। मदुत्कर्षज्ञानार्थं मां विनाथ युवतिषु विहारिणि ॥ अतएव मयि वलेतीत न्यायस्य॥ तत्कामभेव व्यनक्ति॥ तस्य गुणा
नां समूहं गणयति। मामं क्रोधं प्रमादपि नेच्छति॥ दोषं मयि साधारणमाचरणं दूरतो विमुंचति। परितोषं च वहति आत्रो

गणयति गुणग्रामं भामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुंचति दूरतः॥ युवतिषु वलत्तृष्णे कृष्णे वि
हारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किं॥२॥ मालवरागे यतिताले॥ निभृतनिकुंजगृहंगत
यानिशि रहसि निलीय वसंतं चकितविलोकितसकलदिशारतिरभसरसेन हसंतं॥२॥ सखि हे केशिमथनमु
दारं॥ रमय मया सह मदनमनोरथभावितया सविकारं॥ ध्रुं॥ ॥

ति॥ मनसो ऽपि ममानायत्तत्वात्त्वमेवात्र गतिरिति ध्वनिः॥२॥ अथोद्धूतोत्कंठया स्वगुणमविस्मर्तुमशक्नुवती सखीं प्रार्थयते। हे सखि
मया सह केशिमथनं कृष्णं रमय॥ अत्र भुजवीर्यशालिना मोत्कया विविधकेलिसामर्थ्यं सूचितं॥ तत्र हेतुः॥ मदनेन ये स्नायो मनो
रथः विविधसंभोगाभिलाषस्तेन वासितया॥ एतावता विकथं तत्सिद्धिः॥ सविकारं मयि मानसभावेन सहितं। अतः उदारं मनो
रथदातारं॥ ध्रुं॥

१६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनोरथक्रमानेवाह। निशि निभृतनिकुंजगृहं गतया। निर्जनतार्थं निभृतमिति। कुंजस्य रम्यतार्थं गृहमिति च। कीदृशं। स्वालाभाभ्रमवैक
ल्यादिदिदृक्षया रहसि निलीयवसंतं। चकितेयथास्यात्तथा कृष्णः कुत्र निलीयास्त इति विलोकिताः सकलादिशो यया। वहिरभसाद्रुच्छ
लितरसेन मद्वैकल्यं समीक्ष्य हसंतं॥१॥ प्रथममिलनेन लज्जितया॥ निम्पनवनवानुभवात्प्रथोक्तं। ममप्रसादनसमर्थैर्नानाविन
योक्तीनां शतैर्मामनुनयंतं। मृदुमधुरस्मितेन युक्तं भाषितं यस्याः स्वचाटुभिरपगतसलज्जावामतां मां स्मितादिभिर्ज्ञात्वा शिथिलं

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं। मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं ॥ २ ॥
किशलयशयननिवेशितया चिरमुरसि ममैव शयानं। कृतपरिरंभणचुंबनया परिरभ्यकृताधरपानं ॥ ३ ॥ अ
लसनिमीलितलोचनया पुलकावलिललितकपोलं। श्रमजलसकलकलेवरया वरमदनमदादतिलोलं॥ ४॥
कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं। श्लथकुसुमाकुलकुंतलया नखलिखितघनस्तनभारं॥ ५॥

कृतं जघनस्थं दुकूलं येन ॥२॥ ततः पल्लवशय्यायां शायितया चिरकालं व्याप्य ममोरसि शयानं। ततश्च कृते परिरंभ
णचुंबने यया अथ परिरभ्य कृतमधरपानं येन॥३॥ ततो रसालसेन निमीलिते लोचने यया। पुलकावलिभिर्ललितं कपोलं यस्याः।
श्रमजले सकलकलेवरे यस्याः। वरमदनमदादतिलोलं पुनः केलिष्वतिचंचलं॥४॥ कोकिलस्य कलरव इव कूजितं यस्याः। जि
तोभिभूतः कामशास्त्रस्य विचारो येन। अत्र तत्कालोक्तक्रियापूर्वापरभावोत्र श्लाघ्य एव। अतः श्लथकुसुमैराकुलाः कुंतलाः य
स्याः। नखैर्लिखितो घनस्तनभारो येन ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



चरणयोरलितौ मणिमयनूपुरौ यस्याः। अनेन लीलाविशेषः सूचितः। ततः संपूर्णतां नीतः सुरतस्य वितानो येन। तदेवाह। पू
र्वं मुखरा पश्चाद्विश्रृंखला त्रुटितगुणा कांची यस्याः। केशग्रहणेन सह चुंबनदानेन यस्याः॥ ६॥ रतिसुखस्य यः समयस्तस्याव
सानं तत्र योरसत्तिनालसो यस्याः। दरमुकुलितेन नयनसरोजे यस्याः। अनेन द्वयोर्युगपदावेशेन रतेरवसानः सूचितः नि
:सहनमलसत्वमिति यावत्। निःसहेम निपतिता तनुलता यस्याः। मधुसूदनमिति श्लिष्टं। अनेन भृंगो यथा अन्यकुसुम

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं। मुखरविश्रृंखलमेखलया सकचग्रहचुंबनदानं॥ ६॥
रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं। निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं
॥ ७॥ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीले। सुखमुत्कंठितगोपवधूकथितं वितनोतु
सलीलं॥ ८॥

वल्लीनां मधुक्रमेणास्वादयन् कमलिन्युत्कर्षमनुभूय तस्यामत्याशक्तो भवति। तद्वदयम पीतिस्वमनसो वैदग्ध्यं बोधितं कथमेते मनो
रथाः सेत्स्यंति। उद्दितः आविर्भूतो मनोजः कामो मय्यभिलासो यस्य॥ ७॥ इदं जयदेवभणितं कर्तृ सुखं वितनोतु। तत्र हेतुः उत्कंठि
ताया गोपवध्वाः श्रीराधायाः कथितं यत्र। अत एव मधुरिपोः सुरतक्रीडां शीलयति स्मारयतीति तत्। यतः सलीलं। [illegible]ः कामितली
लाभिः सह वर्त्तमानं॥ ८॥

नी० १



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पूर्वदृष्टगोपीमंडलस्थस्वसौभाग्यप्रकरनपटीयः श्रीकृष्णस्फूर्त्यानंदमभिप्रायं साक्षाद्दर्शयंती सारोपमाह। कानने गोविंदं व्र
जसुंदरीगणवृतं पश्यामि हृष्यामि च। मुग्धासि त्वं यतस्त्वां विहायान्याभिः सह विहरंतं पश्यसि। हृष्यसि च हृष्यसि। कुटिलभ्रूलता
वतीनां वल्लवीनां वृंदस्योत्सारिणा निजभावोद्बोधकेनापांगेन वीक्षितमपि निकटवर्तिनीं मां दृष्ट्वा विलक्षितो मम विशिष्टरूप
दिदर्शनाद्विस्मितो यः॥ तदुल्लासस्मितसुधया मुग्धमाननं यस्य तेनैव अतिस्वेदेनार्द्रं गंडस्थलं यस्य। अत एव मद्दर्शनावेशेन ह

हसन्नस्तविलासवेशमरुजुभ्रूवल्लिमद्वल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थले। मामुद्वीक्ष्य विल
क्षितस्मितसुधामुग्धानने कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च ॥७॥ दूरालोकस्तोकस्तवक
नवकाशोकलतिकाविकाशः काशारोपवनपवनोऽपि व्यथयति॥ अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुल
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति॥८॥

स्नात्स्खलितो विलासवेशो यस्य ॥७॥ ततः स्फूर्त्यपगमे तं तान्विरहेणाह॥
हे सखि स्वल्पो गुच्छो यासां तासां मध्ये वसंतवर्द्धितानाम् अशोकलतिकानां विकाशः प्रथमपुष्पोद्भवोत्सवो विडः खेनालोक्यतो तथा मत्सरस्ती
रोपवनसंबंधी पवनोऽपि व्यथयति॥ किंच॥ भ्राम्यंतीनां भृंगीनां रणितैः रमणीयापि प्रशस्ताग्रभागयुक्तापि चूतमुकुलप्रसूतिर्न सुख
यति। अशोकोऽपि शोकदायी पवनोऽपि पीडकः रमणीयाप्युद्वेगकरीत्यहो विरहे वैपरीत्यमित्यर्थः॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri





अथ कविरपि श्रीराधयोक्तीतं श्रीकृष्णाभिप्रायं जयन्नाशास्ते। राधिकोत्कर्षनिश्चयेन नवः केशवः वो युष्माकं क्लेशं
हरतु। कीदृशः। गोपीनां मुग्धमनोहरमव्याजमंजुलं निभृतं रहस्यं स्वस्यभावाभिव्यंजनं निरीक्ष्य तत्स्य श्रीराधायाः सर्वोत्तमतां चि
रमेतद्विचारयन् गमिताकांक्षा दूरीकृतान्यनारीदर्शनाभिलाषेण। अतः परोत्तमानाली तिग मिता तस्यां प्रापिताकांक्षा इति वा
भावाभिव्यंजकानि निभृतस्य विशेषणान्याह॥ आकूतेन सह स्मितं यत्र। तदावेशादतिशिथिलोऽत एव गलत्केशवंधो यत्र
तेनैवोत्क्षितं भ्रूवल्ली कं यत्र। तथा। कर्णकंडूयनादिछलेन दर्शितभुजमूलादर्द्धदृष्टस्तनो यत्र॥५॥ अतः सर्गोयं अक्लेशः

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धदृष्टस्तनं॥ गोपीनां नि
भृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः॥५॥ इति श्रीगीतगोविं
देऽक्लेशकेशवो नाम द्वितीयः सर्गः॥ २॥ ॥ कंसारिरपि संसारवासनाबंधशृंखलां॥ राधामा
धाय हृदये तत्याज व्रजसुंदरी॥ १॥

श्रीराधिकाविषयकसाधारणोभासरूपः क्लेशो गतो यस्मात् स केशवो यत्र
इति॥ इति श्रीबालबोधिन्यां द्वितीयः सर्गः॥ ॥ एवं सर्गद्वये न राधामाधवयोः प्रेमोत्कर्षं निरूप्य श्रीराधिकोत्कंठाकथनानं
तरं माधवोत्कंठामाह॥ यथा सा तस्मिन्नुत्कंठिता तथा कंसारिरपि श्रीसम्यक्प्रकारेण राधां हृदये भूत्वा व्रजसुंदरीस्तत्याज॥ बहु
वचनेन त्यागस्य बलवत्प्रयोजनतया स्वतस्या मतिगाढानुरागो ध्वनितः॥ हृदये तद्धारणपूर्वकशारदीयरासात् तद्विस्फूर्त्या चलितः इ
त्यर्थः। तत्र हेतुः। पूर्वानुभूतस्मृत्युपस्थापितविषयस्पृहा वासना। सम्यक्सारभूतायाः शृंखलारूपिताया वासनाया बंधस्य शृंखलां॥

न२



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदनंतरकृत्यमाह ॥ न केवलं सा माधवोपि राधानुरागभंगचिंताकुलो यमुनातटप्रांतकुंजे विषसाद ॥ स्वानुचितकृत्यो च द्विवि-
धविलापं चकार ॥ किं कृत्वा । तत्तत्स्थाने क्षणमपि त्वविरहासहां राधिकामन्विष्य कीदृशः ॥ तस्याः सर्वोत्तमतां जानता पिम-
यामंदधिया शिरीषकुसुमेव वज्रताडनेन परीक्षणमिव कथमेवं कृतमिति कृतः पश्चात्तापो येन ॥ तत्र हेतुः ॥ अनंगस्य राधाप्रा-
प्तिखेदस्य बाणव्रणेन तत्तुल्यव्यथया खिन्नं मानसं यस्य । अनेन तत्सदृशी दशास्योक्ता ॥ २ ॥ विलापमेवाह । हरिहरी

इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः ॥ कृतानुतापः स कलिंदनंदिनी-
तटांतकुंजे विषसाद माधवः ॥ २ ॥ गुर्जरीरागे यतिताले ॥ मामियं चलिता विलोक्य वृतं व-
धूनिचयेन । सापराधतया मयापि न वारितातिभयेन ॥ १ ॥ हरि हरि हतादरतया गता सा कुपि-

त्यनुचितानुसंधानजविषादे ॥ अहो कष्टं सा चिरं प्रणयबद्धमानेनाधिकलालिता त्वस्यां मया हतादरत्वं मत्वा कुपितेव गतेत्यहमुत्-
प्रेक्षे ॥ ध्रु० १ कुतो हतादरत्वमत इति ॥ इयं श्रीराधा वधूसमूहेन निजनिजप्रेमानुरूपविलासेन नतु मदभिप्रायज्ञानेन वृतं मां विशे-
षतो दृष्ट्वा कथमिदमदृष्टचरं पश्यामीति चलिता ॥ अनेनान्योन्यदर्शनं व्यक्तं । कथं तदैव नानुनीता मया दृष्ट्वापि सापराधतया
तां विहायान्यासि विहाररूपया स्वे कथं दर्शयामि मुखमित्यतिभयेन न निवारिता ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

१९

इदानीं गत्वानुनीयतां तत्र ससंभ्रममाह। सा चिरं विरहेण संतापनिवृत्त्यर्थं कमुपायं करिष्यति किं वा वदिष्यतीत्यहं न जाने ॥१॥
अतो मम धनेन गवां समूहेन किं व्रजजनेन वा किं॥ नानाकेलिसुखेन वा किं। गृहेण वा किं। तां विना सर्वं मम किंचित्करमित्य
र्थः॥२॥ अतस्तदनुसंधानमेव श्रेय इति सविमर्षमाह॥ अहं तदाननं ध्यानेनैवं पश्यामि। कीदृशं कोपातिरेकेण कुटिल
भ्रूपत्रं। तेनैव लोहितं॥ कमिव॥ उपरि भ्रमता भ्रमरेण व्याकुलमरुणपद्ममिव॥३॥ अथ तत्स्फूर्त्याह। तो निरंतरं

किं करिष्यति किं वदिष्यति सा चिरं विरहेण। किं धनेन किं जनेन किं मम सुखेन गृहेण॥२॥ चिंतया
मि तदाननं कुटिलभ्रूकोपभरेण। शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥३॥ तामहं हृदि संग
तामनिशं भृशं रमयामि। किं वनेनुसरामि तामिह किं वृथा विलपामि॥४॥ तन्वि खिन्नमसूयया हृदयं
तवाकलयामि तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि॥५॥

हृदि वसंतीमपि दूरः प्राप्तामत्यर्थं रमयामि। वने किमर्थं वानुसरामि। तामुद्दिश्य किं वा वृथा विलपामि॥४॥ स्फूर्त्यपगमे उ
नराह। हे तन्वि तव हृदये त्वदुत्कर्षज्ञानार्थकृतक्रीडारूपे गुणे दोषारोपेण त्वद्युक्तमहं वेद्मि। तत्कथं नानुनयसि कुतो ग
तासि तन्न वेद्मि। तेन हेतुना तेन तव पादग्रहणादिना नापराधं क्षमापयामि॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १९

वमे १ मि २

पुनस्फूर्त्याह। त्वदनुसरणाय कृतोद्योगस्य मे पुरतस्त्वमेव यातायातं विदधासीति हृष्यसे। तत् किं पुरेव ससंभ्रमं परिरंभणं न ददा
सि॥६॥ पुनस्फूर्त्यपगमे। हे सुंदरि क्षम्यतामपराधं प्रमादि किं मम परमीदृशमपराधं कदाचिदपि न करोमि। ज्ञातोपराधः त
र्हि दर्शनं देहि। मनो मथ्नातीति मन्मथो विरहस्तेन दुनोमि। स्वाधीने पराधिनि दंडस्य व युक्तो नोपेक्ष्यते इति भावः॥ ९॥ श्रीजयदेव
केन हरेरिदं विलापं वर्णितं। कीदृशेन। प्रवणेन नम्रेण। पुनः कीदृशेन। केंदुविल्वनामा जयदेवस्य निवासग्रामः केंदुविल्व

हृष्यसि पुरतो गतागतमेव विदधासि। किं पुरेव ससंभ्रमं परिरंभणं न ददासि ॥६॥ क्षम्यतामपरं कदापि तवेदृशं न
करोमि देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि ॥७॥ वर्णितं जयदेवकेन हरेरिदं प्रवणेन ॥ केंदुविल्वसमुद्रसंभ
वरोहिणीरमणेन ॥८॥ हृदि विशलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः
मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि ॥ २ ॥

मिति कुलं च तयोर्महत्वात् समुद्र इवेनोक्तिस्तदुद्भवचंद्रेण॥ यथा समुद्रोद्भवश्चंद्रः समुद्रवृद्धिकरस्तथायमपि तदभयवृद्धिकर
इत्यर्थः॥८॥ मन्मथनाममात्रेण साक्षाद्विव तत्स्फूर्त्या सदैन्यमाह। हे अनंग क्रुधा किमु धावसि॥ मदर्थं चेत्तर्हि हरभ्रांत्या मयि प्र
हारं न कुरु। अहं हरो न भवामीति हरभ्रांतिं वारयति। प्रियारहिते। सतु प्रियायुक्तः। तल्लक्षणानि दृश्यंत इति चेन्न। हृदये मृणालल
ताया हारो वासुकिर्न। कंठे इयं कुवलयदलश्रेणी सा गरलद्युतिर्न। सर्वांगे इदं चंदनरजः भस्म न। अतो मयि हरभ्रांतिर्न कार्येत्यर्थः
॥२॥

३

नकेवलंमदेगदाहाच्छिवोममवैरीत्वम   पुष्पेधितशाशनत्वादतस्त्वमपिप्रहरिष्यामीतिसभयमाह। हेमनसिजअंसुंचूतमुकु
लबाणेपाणौमाकुरु। यदिपाणौकृतबाणोसिनर्हिपाणावेवस्तांचापंमारोपय चापारोपितोयंप्राणान्हरिष्यत्येव। किंचवीरस्येत
त्कातरपीडनंनयुक्तमित्याह॥ क्रीडयानिर्जितंविश्वंयेनहेताहृश। मूर्छितजनस्यप्रहारेणकिंपौरुषंनकिमपि। कथंत्वंमू
र्छितः। तस्याश्रीराधायाश्चवोछलत्याकटाक्षबाणश्रेण्याजर्जरितेममममोल्पमप्याघापिनसंधुक्षते दीप्यतेनतुस्वभवतीत्य

पाणौमाकुरुचूतसायकममुंमाचापमारोपयक्रीडानिर्जितविश्वमूर्छितजनाघातेनकिंपौरुषं॥ तस्याएव
मृगीदृशोमनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितंमनागपिममोनाघापिसंधुक्षते॥४॥ भ्रूपल्लवंधनुर
पांगतरंगितानिबाणाःगुणःश्रवणपालिरितिस्मरेण॥ तस्यामनंगजयजंगमदेवतायामस्त्राणिनिर्जितजगंतिकि
मर्पितानि॥५॥

र्थः॥४॥ कामेवर्णयन्श्रीराधिकाकटाक्षाश्च ग   स्मरणेनतत्स्फूर्त्यानंविस्मृत्यतामेववर्णयन्ना
ह॥ इत्येतान्यस्त्राणितस्यांश्रीराधायांस्मरेणार्पितानिकिमित्युत्प्रेक्षते। वीरेणहस्तस्थितियोग्यानिकुतोर्पितानि। निर्जितानिजगं
तियैः। तत्प्रसादलब्धास्त्रैर्जगज्जित्वाजातप्रयोजनानिपुनस्तस्त्रैवार्पितानीत्यर्थः। तस्यामेवार्पणेहेतुः। अंगरहितस्यापिकाम
स्यजयस्यजंगमदेवतारूपायांकान्यस्त्राणीत्याह॥ भ्रूपल्लवमेवधनुः। अपांगतरंगितानिकटाक्षाःइत्यर्थः। नान्येवबाणाः।
श्रवणपालिःकर्णप्रांतभागःसैवगुणइति॥५॥ २०

CC0. In Public Domain, Digitizagtion by eGangotri

तदंगान्स्वोपलंभनेनामेवामेत्थपृच्छति। हेतान्वितवभ्रूचापारोपितः कराक्षवाणोममर्म्मव्यथांकरोतु। ना[illegible]नौचित्यं। चापारो
पितवाणस्यमर्मपीडनस्याभाव्यात्। तथावक्रः केशपाशोपिमारणायपराक्रमंकरोतु॥ कथंभूतः। श्यामात्मा। नात्राप्यनौ
चित्यंकुटिलात्मनोमलिनस्यमारकस्वभावत्वात्। विं वफलतुल्योयमधरोमूर्छीतनुतां। नात्राप्यनौचित्यं। यतोयंरागवान्
रागी। इदंत्वनुचितंसद्वृत्तः सुवर्त्तुलः स्तनमंडलः ममप्राणहरणरूपांक्रीडांकिमितिकरोति। सद्वृत्तस्यतथाचरणमयु
क्तमित्यर्थः॥६॥ किमन्योपालंभेन किंवापूर्वापेक्षयाधुनान्यूनमस्तीतिमन्यमानस्त्वात्मानमुपालभते। हंतेतिखेदाश्चर्ये।

भ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुमर्मव्यथांश्यामात्माकुटिलःकरोतुकवरीभारोपिमारोद्यमं॥मोहंतां
वदधेचतन्वितनुतांविंवाधरोरागवान्सद्वृत्तःस्तनमंडलस्तववकथंप्राणैर्ममक्रीडति॥६॥तानिस्पर्शसुखानि
तेचतरलास्निग्धादृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभंसचसुधास्यंदीगिरांवक्रिमा॥साविंवाधरमाधुरीतिविषया
संगेपिचेन्मानसे।तस्यांलग्नसमाधिहंतविरहव्याधिःकथंवर्द्धते॥७॥

तस्यांराधायांयद्दिमन्मनोलग्नसमाधिप्राप्ततत्साक्षात्कारानंदंतर्हिविरहव्याधिःतापवैस्यादिःकथंवर्द्धते। सत्यपिमनःसंयो
गेचक्षुरादिपंचेंद्रियाणांसंयोगाभावाद्विरहव्याधिर्युक्तइतिचेदत्राह। इत्युक्तप्रकारेणविषयासंगेयथापूर्वंपंचेंद्रियसुखेनु
भूयमानेपीत्यर्थः। कोसौप्रकारः। तानिस्पर्शसुखानिपूर्वानुभूतानीत्यर्थः। अनेनत्वगिंद्रियसुखं। तथातेचतरलाःस्निग्धादृशोर्वि
लासाः इतिचक्षुरिंद्रियस्य। तद्वक्त्रांबुजसौरभं इतिघ्राणस्य । सचसुधास्यंदीगिरांवक्रिमाइतिश्रोत्रस्य। साविंवाधरमाधुरीइति
रसनेंद्रियस्यइति॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



द्वि १

अथकविर्मुग्धेतिश्रीराधावचनप्रमाणीकृतगोपीमंडलस्यश्रीकृष्णस्यपूर्वोक्तश्रीराधादर्शनप्रकारमाह।मधुसूदन
स्यकटाक्षस्तरंगावोयुष्माकंक्षेमंदधतु॥ पूर्वोक्तमधुसूदनपदतात्पर्यंव्यनक्ति। कीदृशाः। राधामुखेंदौईषच्चंचलेसं
मुग्धंचयथास्यात्तथावृद्धिंप्राप्ताः।अन्यगोपांगनामुखोडुगमध्येपतत्रेवोल्लसिताइत्यर्थः॥ कथमनेकांगनानिकरेत
त्सत्त्विद्भिः। वंशोच्चरद्गीतिस्थानेषुस्वरालापादिषुसमर्पितचित्तवृत्तिभिर्ललनालक्षैर्नसंलक्षिताः। गीतिस्थानंमुख

तिर्यक्कंठविलोलमौलितरलोत्तंसस्यवंशोच्चरद्गीतिस्थानकृतावधानललनालक्षैर्नसंलक्षिताः।सं
मुग्धंमधुसूदनस्यमधुरेराधामुखेंदौमृदुस्पंदंकंदलिताश्चिरंदधतुवःक्षेमंकटाक्षोर्मयः॥ इतिश्री
गीतगोविंदेमुग्धमधुसूदनोनामतृतीयःसर्गः॥ ३ ॥ ॥ ॥

मितिवा। अनेनताहृशैरप्यलक्षितत्वेनचातुर्यंसूचितं। नकेवलंगीतिस्थानावधानमात्रेणालक्षितत्वमपितुतज्ज्ञानसौष्ठवेना
पीत्याह॥ तिर्यक्कंठोयस्य। विलोलंशिरोभूषणंयस्य। तरलंकर्णभूषणंयस्य।सचसचसचतस्य॥ अतएवमुग्धश्चासौम
धुसूदनश्चतन्मुखेंदुदर्शनाविष्टोरसविशेषास्वादचतुरोमधुसूदनोयत्रसइत्ययंसर्गः॥ इतिबालबोधिन्यांतृतीयःसर्गः
॥ ३ ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अथश्रीराधिकोत्कंठितं श्रीकृष्णं स्वसखीमाश्वास्यागतासखी प्राहेत्याह॥ श्रीराधिकासखीमाधवं प्रत्याह॥ कीदृशं श्रीराधिकाविषयकप्रेमाधिक्येनोद्भ्रांतं उन्मत्तं। अतएवतद्द्वेषणं विहाय विलप्यच यमुनातीरस्थवेतसीकुंजे मंदे निरुद्यमं यथातथास्थितमासीनं॥१॥ तदेवाह॥ हेमाधवसाधातवविरहनिमित्तं दीनाऽऽखिन्ना॥ तत्रोत्प्रेक्ष्यते॥ कामबाणाद्भयं तस्मात्त्वयिध्यानेन लीनेवास्ति। बाणप्रयोक्तरि कामरूपेत्वयि लीनेतद्भयं नस्यादित्यर्थः॥ ध्रु॥ नकेवलमिदं चंदनमिंदु किरणंच विंदति

यमुनातीरवानीरनिकुंजे मंदमास्थितं॥ प्राहप्रेमभरोद्भ्रांतं माधवं राधिकासखी॥१॥ कर्णाटरागेएकतालीताले॥ निंदति चंदनमिंदुकिरणमनु विंदति खेदमधीरं॥ व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं॥१॥ सा विरहे तव दीना॥ माधव मनसिजविशिखभयादिव भावनया त्वयि लीना॥ध्रु॥ अविरलनिपतितमदनशरादिव भवदवनाय विशाले। स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजाले॥२॥ ५।।

स्वभावशीतलोयस्मोदहतोतेोधिगेतो॥ अथवा ममैव दुर्दैवमित्यनुपश्चाद धीरं यथातथा॥ खेदं विंदति॥ तथामलयसमीरं चंदनतरोः संपर्केण गरलमिव मन्यते। तत्रस्थसर्पैर्भक्तो ज्झितो वायुर्विषमिश्रितत्वाद्विषमिवोत्प्रेक्ष्यते॥१॥ त्वय्यतिस्निग्धासात्वंकथे निष्ठुरोसीत्याह। स्वहृदयमर्मस्थाने सजलनलिनीदलजालं पृथुलं कवचं करोति। तत्रोत्प्रेक्ष्यते। निरंतरनिपतितमदनशरभयात्तवरक्षणार्थमिव॥ तस्याहृदयेभवांस्तिष्ठति हृदयेकामो विध्यति मर्मस्थानत्वात्॥ हृदयवेधनाच्चभवतोपिवेधः स्यादितिभवद्रक्षणार्थं सन्नद्धतइत्यर्थः॥२॥

Dr. Urmila Sharma Collection, Varanasi

सन्नद्धतद्र्स्यैवनतमप्याराधयतीत्याह॥ साकुसुमशय्यांकरोति॥ कीदृशं॥ अनल्पविलासकलाभिःकमनीयं। विरहेतदपिकु
सुमशरशय्यायत इत्युत्प्रेक्षते॥ कामशरशय्याव्रतमिव। जीवनसंदेहापादकमतिदुःकरं किमितिकरोति। नवपरिरंभसुख
य। पतितशराणांकवचोन्नरक्षेतिसंभाव्यकुसुमैरेवतमाराधयामियथातत्प्रसादाच्छराःकुसुमान्येवभूत्वामदुरःपरिरंभेतं
सुखयेयुरितितिव्रतंकरोतीत्यर्थः॥ ३॥ तथाकृत्वापितस्यातिक्रूरतास्फूर्तिविकल्पेनांतर्विगलितधैर्याभवतीत्याह। उदारम
नमकमलंचवहति। कीदृशं। वलितान्यविरतंगलिता विरतंगलितानिविलोचनयोर्जलानिधारयतीतितत्॥ कमिव। वि

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं। व्रतमिवतवपरिरंभसुखायकरोतिकुसुमशयनीयं॥
३॥ वहतिचवलितविलोचनजलधरमाननकमलमुदारं॥ विधुमिवविकटविधुंतुददंतदलनगलितामृत
धारं॥४॥ विलिखतिरहसिकुरंगमदेनभवंतमसमशरभूतं। प्रणमतिमकरमधोविनिधायकरेचशरंनवचूतं॥५॥

धुमिव। कीदृशं। करालस्यराहोर्दंतैःखण्डनगलितामृतधारायस्य॥ अनयाभूतोपमयेदृक्दशाक्रांतिविनष्टाशंकृतावातोऽस्याः
किंस्यादितिनजानामीतिध्वन्यते॥४॥ ततस्त्वदावेशात्त्वामेवकामरूपेणाराधयतीत्याह। रहसिसख्याद्यप्रदृश्यस्थानेकस्तू
रिकयात्वदंग... वर्णसौरभयाभवंतंलिखति। कीदृशं। त्वस्मिन्नुभयोःप्रातिकूल्याचरणंस्मरणात्स्मरणाभेददृष्ट्यातथाभू
तं॥ ततस्तादृश्यमाह॥ मकरमधोविनिधाय। नवाम्रमुकुलशरमपिकरेविनिधाय हेनाथगृहीतवाहनास्त्रस्त्वंमांकिमितिप्रहर
सीतिप्रणमति। त्वदन्यःकामोनास्तीतिमत्वेत्यर्थः॥ स्वचित्तोन्मादकत्वात्॥ ५॥॥

CC0. In Public Domain, Digitizagtion by eGangotri

किंच। हेमाधवमधोःसखेतवचरणेहंपतिताइदमपिप्रतिक्षणंजल्पति॥कथंमच्चरणेपतसि। त्वयिविमुखेसतितनुतरणेदेवा
मृतनिधिःसर्वतापनिर्वापकोपिमयितनुयथास्यात्तथातनुदाहंतनुते॥६॥पुनश्चातिव्यग्रतयाध्यानलयेनभवंतंसाक्षादि
वकृत्वाविलपति। कथंतथाकरोतिसाक्षात्कथंनक्रियते॥दुरापंदूतैर्विषणादिनाप्यप्राप्यं। साध्वसेनमंदंमंदमभिमु
खमायांतंविभाव्यायातोमज्जीवातुरित्यानंदोच्छलिताहसति। पुनःस्वयमागमनलज्जयांतर्हितंविभाव्यविषीदत्यार्नो

प्रतिपदमिदमपिनिगदतिमाधवतवचरणेपतिताहं। त्वयिविमुखेमयिसपदिसुधानिधिरपितनुतेतनु
दाहं॥६॥ध्यानलयेनपुरःपरिकल्प्यभवंतमतीवदुरापं॥ विलपतिहसतिविषीदतिरोदितिचंचति
मुंचतितापं॥७॥श्रीजयदेवभणितमिदमधिकंयदिमनसानटनीयं॥ हरिविरहाकुलवल्लवयुवति
सखीवचनंपठनीयं॥८॥

रोदितिच॥पुनःपुरःस्फुरंतमनुधावति॥पुनःप्राणजीवितवल्लभमित्यालिं
गनादिनातापंमुंचति॥७॥उक्तसख्युक्तिमध्येप्याधिक्यंव्यनक्ति॥यदिमनसानटनीयंनर्तयितव्यंतदाश्रीजयदेवभणि
तमिदमधिकंयथास्यात्तथावधानेनपठनीयं।कुतोत्राधिक्यंहरिविरहाकुलायाःश्रीराधिकासख्याःवचनेयत्र॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सात्वां विना कुत्रापि न निर्वृतिं लभत इत्याह ॥ सा त्वत्सर्वार्द्धप्रेमलालनसौभाग्या श्रीराधा त्वद्विरहेण हंत खेदे हरिणीरूपायते च्छीणोपायाशक्यप्रतीकार तयाहरिणीवाचरति। तत्प्रकारमाह ॥ निरंतरानेकनृत्यगीताद्युत्सवसंकुलो निवासोप्यरण्यमिवाचरति ॥ प्रवेष्टुमप्यशक्यो भवतीत्यर्थः ॥ त्वत्संगमंतरेण दुःखदत्वात् ॥ प्रियसखीमालापि जालमिवाचरति ॥ कुत्रचिद्गमनसेकयाजालवत्परितो वेष्टनाद्गंतुमप्यशक्यत्वात् ॥ गात्रसंतापोपि निःश्वासेन तथा संतापयति ॥१॥

आवासो विपिनायते प्रियसखीमालापि जालायते तापोपि श्वसितेन दाववहनज्वालाकलापायते ॥
सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितं ॥ २ ॥

यथा वा तेनाग्निरुल्कानिकरस्य यस्या पि दाहकानिर्गच्छंतीत्यर्थः । कंदर्पोपि शार्दूलविक्रीडितेनामग्रहणमात्रेण भयापादकचेष्टां विरचयन् कथं किमिति यम इवाचरति। यथा वने मृगी दावज्वालयोद्विग्ना व्याघ्रत्रासिता जालपतिता कापि निर्वृतिं न लभते तथेयमपीत्यर्थः । प्रत्येकेनानेन हरिण्याः इव राधायाः प्रियहृदानुरागो दर्शितः श्रीकृष्णस्य काठिन्येपि स्निग्धायाम
स्नेहव्यवसायत्वात् ॥ २ ॥ २२

श्रीः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनस्तदवस्थचेष्टामेव विशेषयति॥ हे केशव सा राधा सखीभिर्यः तैः स्तनविनिहितमुत्कृष्टमपि हारं तव विरहे भारमिव
मनुते। तत्र हेतुः॥ कृशतनुः॥ तथेयं कृशाभूद्यथा हारवहनसामपि नास्तीत्यर्थः॥१॥ न केवलं तदसामर्थ्य
मपि तु तापशांत्यै सरसमपि मसृणं चिक्कणमपि चंदनपंकं वपुषि दत्तं वक्रमशङ्कासशंकं यथा स्यात्तथा विषमिव पश्यति
॥२॥ तथा तत्स्पर्शोद्दीप्तदाहसहितं निश्वासपवनं कामाग्निमिव पश्यतीत्युत्प्रेक्षा॥ कीदृशं। उपमारहितं दैर्घ्यं यस्य

देशागरागेण्कतालीताले॥ स्तनविनिहितमपि हारमुदारं। सा मनुते कृशतनुरिव भारं॥ च॥ राधिका
विरहे तव केशव॥ ध्रुं॥ सरसमसृणमपि मलयजपंकं। पश्यति विषमिव वपुषि सशंकं॥२॥ श्वसितप
वनमनुपमपरिणाहं। मदनदहनमिव वहति सदाहं॥३॥ दिशि दिशि किरति सजलकणजालं। नयनन
लिनमिव विदलितनालं॥४॥ नयनविषयमपि किशलयतल्पं। कलयति विहितहुताशविकल्पं॥५॥

॥३॥ ततस्त्वदागमनस्फूर्त्या नयननलिनेत्वदृष्टासंभ्रमाद्दिशि दिशि विक्षिपतित दपगमात्कथमधुना विनायातीति जल
कणिकाभिः सहितं॥ कमिव॥ छिन्ननालमिव॥ छिन्ननाले हि कमले सत्ववं विच्छिन्नं च भवतीत्यर्थः॥४॥ कदाचित्कुंजांतः
पल्लवतल्पमागतः स्यादिति कुंजांतः प्रविश्य पल्लवशय्यां नयनविषयेसत्कृतोवह्नेर्विकल्पो भ्रमो यत्र तादृशं पश्यति॥५॥

Dr. Urmila Sharma Collection, Varanasi

हरिरिति ३

ततोपि विफलोद्यमा कथं रात्रिं गमयामीति चिंतया पाणितलेन कपोलेन त्यजति। कामिव। सायं अंचचलं बालशशिनमिव। कपोलस्यार्द्धभागदर्शनात् पांडुत्वाच्च बालचंद्रेणोपमा॥ ताम्रत्वात् पाणितलस्य संध्यायाः साम्यं॥ ६॥ ततस्त्वितियोद्भूतनिर्वेदात् सकामे साभिलाषे हरिहरीति निकामे यथेष्टं जपति॥ अंते यामतिः सा गतिरिति जन्मांतरेपि स वल्लभोभू

त्यजति न पाणितलेन कपोलं। बालशशिनमिव सायमलोलं॥ ६॥ हरिरिति हरिरिति जपति सकामे॥ ७॥ श्रीजयदेवभणितमिति गीतं। सुखयतु केशवपदमुपनीतं॥ ८॥ ॥ ॥
विरहविहितमरणेव निकामं। १

यादिति सकामत्वं। केव। विरहेणारब्धं मरणं यस्याः सेव॥ ७॥ विरहात्मकवचनं न श्रोतव्यमित्याशंकां वारयन्नाशिषयति॥ इत्यनेनोक्तप्रकारेण श्रीजयदेवभणितेगीते केशवपदमुपनीते। प्राप्ते तत्पदयोः समर्पितचित्तमित्यर्थः॥ सुखयतु॥ वर्तीयमानानप्रपद्ये ग्रामैः सपदि दुःखवत्॥ करुणाद्याः रसाः प्राज्ञैः प्रोदानंदतया मताः। इत्यादिवाक्यात्॥ ८॥

यदीदृगवस्थाजातैवतदामद्गमनेनकिंस्यादित्याशंक्यसनिर्वेदमुपालभते। हेअश्विनीकुमारवद्वैद्य किंकर्तव्यंयदिप्रसीदसिन
देतारस्यतनुज्वरे ऽनल्पज्वरेसावरतनुः खेदासहनगात्रीतिरसप्रयोगात् किंनजीवेद्यदितुजीवेद्दैवेनिष्ठलोक्तिः। वास्तवः
कामज्वरः ज्वरलक्षणान्याह॥ सारोमां चतिपुलकांचिताभवतीत्यर्थः॥ शीदितिशब्दंकरोतीत्यर्थः॥ विलपतिउच्चैःकंप
ति। ग्लानिमाप्नोति। कथंलभ्यतेइतिचिंतयति। उच्चैर्भ्राम्यति॥ अक्षिणीसंकोचयतिभूमौलुठतिउत्थातुमिच्छति॥ मूर्छा

सारोमांचतिशीत्करोतिविलपत्युत्कंपतेताम्यतिध्यायत्युद्भ्रमतिप्रमीलतिपतत्युद्यातिमूर्छत्यपि॥ ए
तावत्यतनुज्वरेवरतनुर्जीवेन्नकिंतेरसास्त्ववैद्यप्रतिमप्रसीदसिनचेत्युक्तोन्यथाहस्तकः॥ २॥ ॥

माप्नोति। महाज्वरस्यादौरसदानंनिषिद्धं। अन्यथाप्रकारांतरेणहस्तक्रियापाचनाद्यौषधानंतरदानेवैद्यैस्त्यक्तः। दाने
यौषधस्यविशेषाप्रान्ने इत्यर्थः। कामज्वरपक्षेहस्तक्रियाशीलाद्युपचारःसखीभिस्त्यक्त इत्यर्थः। कृतेष्युपचारेनहृद्रोर
तिभावः। वैद्यानोहमहादिदमयशोयन्निजरसौषधोपचितव्यथायाउपेक्षणं। वरतनुरित्युक्त्यातत्सामान्यान्नास्त्यतस्त
स्यारक्षणंदेववैद्यसमस्यतवयुक्तमित्यपिसूचितं॥ २॥ ॥ ० ॥ ॥ ॥ ० ॥ ॥ १॥

२५

अधिक २

तदेव कलौ कंसरत्यार्त्तिस्मरणे वैकल्पात्साक्षात्कथयति ॥ हे दैवतनैद्यास्मामपि कृष्णमिषुनः । इंद्रवज्राद्यपि अधिकमुपेंद्रवज्रं
तदपि चेदवैत्त्वस्मादपि त्वमति दारुणोसीति मन्ये । यत इंद्रक्षिप्तो वज्रो अंगं संस्पृश्य व्यथयति त्वं तु विश्लेषेण तत्रापि दूरतोतङ्गोपो
षितैर्दारुणोसीत्यर्थः ॥ कुतस्त्वेवं मन्यसे । यतस्त्वदंगसंगामृतमात्रसाध्यां स्मरातुरीं राधां विमुक्त्वा धावं न करोषि । त्वदंगसंगमा
त्रसाध्यव्यथायाः स्वयशोरक्षणमपि स्वस्थीकरणात्काठिन्यमेवत्वेपर्यवसितमित्यर्थः ॥ ३ ॥ शीतोपचारैः पुनस्तापे

स्मरातुरां देव तवैव कृष्ण त्वदंगसंगामृतमात्रसाध्यां ॥ विमुक्त्वा बाधां कुरुषे न राधामुपेंद्रवज्रादपि दारुणो
सि ॥ ३ ॥ कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमःकमलिनीचिंतासु संताम्यति ॥
किंतु क्षांतिरसेन शीतलतरं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥ ४ ॥

शमयेत्सत आह ॥ कंदर्पज्वरेणयः संतापः तेनातुरतनोः प्रतिक्षणं निश्शंकापादकवेहायाः श्रीराधाया आश्चर्यं । तत् किं ॥
चेतश्चंदनादीनां सर्वसंतापशमकतया प्रसिद्धानां स्मरणेपि चिरं संताम्यति । स्पर्शादिकं तु दूरेपरिहृतमित्यशक्यप्रतीकार
तोक्ता । यद्येवं तर्हि कथं जीवति । त्वदागमनप्रतीक्षया क्षांतिस्तत्र यो रसोनुरागस्तेन त्वामेकमेव प्रियं ध्यायंती क्षीणापि कथमपि
क्षणं जीवति ॥ एकमेवेत्यनन्यगतिकत्वं सूचितं ॥ अतस्त्वया शीघ्रं गंतव्यमित्यर्थः ॥ कीदृशं शीतलतरं ॥ चंदनादयः शीतला
स्तेभ्यः शीतलतरं त्वद्ध्याने तापनिवृत्तिः त्वद्ध्याने जीवतीत्याश्चर्यांतरमित्यर्थः ॥ ४ ॥ ॥ ॥ २५

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा ४

यथेमत् कालं जीवितातथा ग्रेजीविष्यतीति प्रस्तुक्तिशंकाकुलासदैन्यमाह। नयनयोर्निमिषमात्रेण हा कथं नयनयोर्निमेषोन्मिलितोयेन प्रियदर्शनं क्षणं क्षणं विरमति इति खिन्नयायया राधया पूर्वं नव विरहः क्षणमपि न सोढः। असौ चिर विरहेण मुकुलिताग्रभागयुक्तां रसालशाखां विलोक्य कथं जीवति। निमेषविरहासहनशीलायाश्चिर विरहे जीवनमसंभावनमित्यर्थः॥५॥ एवं श्रीराधावृत्तांतं निरूप्य सखीमुखेनैव श्रीकृष्णवृत्तांतं श्रीराधायैर्वर्द्धमानमनुसंदधानः कविस्तदुप

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते। श्वसिति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्रां॥५॥ वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्द्धनं बिभ्रत्वल्लववल्लभाभिरधिकानंदाच्चिरं चुंबितः॥ दर्पेणेव तदर्पिताधरतटीसिंदूरमुद्रांकितो बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि केसद्विषः॥६॥

यो गितया गोपीजनानंदसंदोहशोसि धृतगोवर्द्धनबाहुव र्णनेनाशास्ते॥ गोपरूपतनोर्वा
ऽर्भवतां श्रेयांसि तनोतु। तत्सामर्थ्यं व्यनक्ति। दर्पेणेवाहंकारेणेव। अर्थादिंद्रस्य विजिगीषया। गोवर्द्धनाचलमुद्धृत्य बिभ्रत्। तत्र हेतुः॥ वृष्ट्या व्याकुलस्य गोकुलस्य पालने योरसो वीररसस्मात्॥ कीदृशः। गोपांगनाभिः श्रीकृष्णस्य
वैदग्ध्यसौंदर्यादिकमुद्वीक्ष्याधिकानंदाच्चिरं चुंबितः॥ तत्रोत्प्रेक्षते॥ तच्चुंबनात्तन्मललाटस्थसिंदूरेण इंद्रजयलेखोचितमुद्रयांकित इव॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अत एव श्रीराधिकावैकल्पश्रवणेन मंदश्रेष्ठा रहितो मधुसूदनोयत्रैं इति सर्गः॥ इति बालबोधिन्यां चतुर्थः॥ ॥ १॥
तद्वृत्तांते विवृणोति अहं तदा निश्रवणव्याकुलोपि स्वापराधचिंतयातिभीतः स्वयं गंतुमशक्नुवन्निहैव पूर्वं कृततत्प्राप्तिसिद्धकुंजे नि
वसामि यावत्त्वागमे तिष्ठामि त्वं राधां याहि॥ गत्वा किं करोमि॥ मद्वचनेन अपराधशमकचाटुनातामनुनय आनयेथाः अ
सहसा मद्गमने मानो गाढो भवेत्। यदि त्वयैव तस्मानमपनेतुं शक्यते॥ तदानयेथा इति भावः॥ इति मधुरिपुणा नियुक्तास
खी स्वयमेत्य श्रीराधां पुनरिदमुवाच॥१॥ किमुवाचेत्याह॥ हे सखि तव विरहे वनमाली त्वत्करकल्पितवनमालामात्रा

इति श्रीगीतगोविंदे मंदमधुसूदनो नाम चतुर्थः सर्गः॥ ४॥ ॥ अहमिह निवसामि याहि राधा
मनुनय मद्वचनेन चानयेथाः॥ इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधां॥१॥ वरा
डीरागे रूपकताले॥ वहति मलयसमीरे मदनमुपनिधाय। स्फुटति कुसुमनिकरे विरहिहृदयदलनाय॥१॥
तव विरहे वनमाली सखि सीदति॥ध्रु॥ दहति शिशिरमयूखे मरणमनुकरोति पतति कुसुमविशिखे विलप
ति विकलकरोति॥२॥

सीदति अवसन्नो भवति कदा कदा
वलेवीसीदतीत्याह॥ मदनं सन्निहितं कृत्वा मलयसमीरे वहति सति॥ तथा विरहिहृदयदलनाय
मर्मपीडनाय कुसुमसमूहे च स्फुटति सति॥ समीरस्पर्शोद्धतकामस्फूर्त्या कुसुमालोकात्तत्कुसुमबाणेर्हृदयं विदीर्यत इव सीदती
त्यर्थः॥२॥ किंच चंद्रे दहति सति मरणमनुकरोति॥ मूर्छामाप्नोतीत्यर्थः। कामबाणे च पतति अति विकलो विलपति। शीतो
सूनामपि संतापमूर्छा ततश्चोत्थितः पुरः कुसुमपतने कामबाणभ्रांत्या विलपतीत्यर्थः॥ २॥ ॥ १॥ ॥ २६
सति २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततोभ्रमरचयेशब्दायमानेक  र्णौकराभ्यामाछादयति॥ उद्विग्नविरहेमनसिनिशिनिशिनिशायाः क्षणेक्षणेधिकाधिकंपी
डामाप्नोति॥ निशायांतत्प्राप्तिसमयत्वात्त्वद्प्राप्त्यामधुपध्वनिश्रवणेोद्दीप्तपीडामाप्नोतीत्यर्थः॥३॥ रुचिरमपिगृहंत्य
क्त्वात्वद्प्राप्त्याशयारण्येमध्येवसतीत्यर्थः॥ विरहवैकल्यादेकत्रस्थित्यभावाद्वितानइत्युक्तिः॥ त्वद्प्राप्त्यात्वांस्मृत्वालुठ
ति। ततोतिव्याकुलोबहुयथातथातवनामविलपति। गृहाद्वनंगत्वात्वन्मयांतःकरणतयासर्वज्ञंनूनंत्वन्नाम्नासंबोध

ध्वनतिमधुपसमूहेश्रवणमपिदधाति। मनसिवलितविरहेनिशिनिशिरुजमुपयाति॥३॥ वसति
विपिनवितानेत्यजतिललितधाम। लुठतिधरणिशयनेबहुविलपतितवनाम॥४॥ भणतिकविज
यदेवेविरहविलसितेन। मनसिरभसविभवेहरिरुदयतुसुकृतेन॥५॥

यतीत्यर्थः॥४॥ कविजयदेवेभणतिसतिहरिविरहविलसितेनमनसिहरिरुदयतु॥ जयदेवभणितेनहरिविरहवि
लसितेनहेतुनायद्उत्पन्नंसुकृतंतेनगायतांशृण्वतांहृदिहरिरुदितोभवत्वित्यर्थः॥ कीदृशेमनसि। रभसस्यप्रेम्णोत्सा
हस्यविभवोयस्मिन्॥ एवंप्राणपरार्द्धनिर्मंछनीयचरणस्यनिजप्राणनाथस्यविरहवैकल्यश्रवणेनमूर्छितायांस्वस
ख्यांतस्याश्चप्रबोधकृतेभोजातइतिस्मृत्वापंचपदैःसमाप्तिः॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२२

अथ तन्मूर्छाविघटनायोपायांतरमपेक्ष्य सखीकल्पाचरितमेव वर्णयति॥ हे सखि पूर्वं यत्र कुंजे कामस्य सिद्धय निरूपमसंभो
गानंदसंदोहास्त्वया सह प्राप्तास्तस्मिन्निकुंज एव मन्मथ महासिद्धिक्षेत्रं तस्मिन् माधवः पुनस्त्वत्कुचकुंभ निर्भरपरीरंभा
मृतं भूयः प्रचुरं वांछति॥ सांद्रानंदसंदोहजनकत्वेन कुचकुंभपरीरंभस्यामृतत्वेन निरूपणं। नन्वेतदतिदुर्लभं तीर्थ
गमनमात्रेण इष्टदेवताराधनं विना कथं सेत्स्यति॥ निरंतरं निजाधिदैवततयाज्ञापादात्प्रत्संगमेकाग्रमनस्का स्त्व

पूर्वं यत्र समं त्वया रतिपते रासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः। ध्यायं
स्त्वामनिशं जपन्नपि तवैवालापमंत्राक्षरं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति॥ २॥

मेव चिंतयन्। त्वमेवेष्टदेवतेत्यभिप्रायः॥ ध्यानेपि मंत्रजपमंतरेणेष्टदेवतानाचिरात्प्रसन्ना भवति। नि ज्ञा१ मिमुख्यापा
दकः प्राणप्रियदयित इत्यादि यस्तव आलापः स एव सिद्धमंत्राक्षरं। तं जपन्। तवैवालापमंत्राक्षरमिति सिद्धमंत्रत्वं महा
तीर्थ इति झटिति सिद्धिप्रदत्वं च ध्वनितं॥ २॥

२७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतद्धुवलेन किंचित् प्रसादोन्मुखी दृष्ट्वा संकेतगमनाय सखी प्रार्थनवचनेन श्रीराधिकाया अभिसारिकावस्थामाह। अभिसा
रिकालक्षणं। यथा। याभिसारयते कांतं स्वयं वाभिसरत्यपि। सा ज्योत्स्नी तामसी यानयोग्यवेषाभिसारिकेति। यमुनातीरेव
ने वनमाली उत्कंठासूचकवेषो वसति त्वदागमं निरीक्षमाणश्चास्ति। कीदृशे वने। मंदः समीरो यत्र। अनेन सुखदत्वं निर्जनत्वं
चोक्तं॥ ध्रुं॥ वने तद्गमनमभ्यार्थं चेत्त्र॥ संकेतितत्वदभिसरणस्थाने गतं प्राप्तं। कीदृशे रतिसुखमेव सारो यत्र। तद्योग्य
वेषमाह॥ मदनेन त्वन्मिलनाभिलाषोत्सुक्याधिक्येन मनोहरो वेषो यस्य। अतो हे नितंबिनि जघनभाराक्रांततया शीघ्र

गुर्जरीरागे एकतालीताले॥ रतिसुखसारे गतमभिसारे मदनमनोहरवेशं। न कुरु नितंबिनि गमनविलंब
नमनुसर तं हृदयेशं॥१॥ धीरसमीरे यमुनातीरे वसति वने वनमाली॥ ध्रुं॥ नामसमेतं कृतसंकेतं वाद
यते मृदु वेणुं॥ बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुं॥ १॥

गमनासमर्थे गमनविलंबनेन कुरु॥ तर्हि किं करोमि॥ तमनुसर। कीदृशे। हृदयेशं त्वत्प्राणनाथं॥ तावत्तेवसकोदशांगमि
ष्यतीति न जाने तस्त्व विरहदुःखितस्याभिसरणेन तव विलंबो न युक्त इत्यर्थः॥१॥ बहुवल्लभः कदाचिदन्यां गनामभिसृतः स्या
त्। कुतः संकेतो निजावस्थाव्यंजको यत्र तं वेणुं तव नामसमेतं मृदु चान्यालक्षितं यथा स्यात्तथा वादयते॥ धूर्तः कदाचित् प्रतार
णार्थं करोति॥ तव तनुसंगतवायुना ... चुक्तं वेणुं बहु मनुते॥ धन्योयं वेणुर्यत्तस्यास्तनुस्पृष्टवायोः स्पर्शसुखमत्र भूत्ममे
दृग्भाग्यं नास्तीति बहुमानार्थः॥ २॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



स्या २ जौ ३

त्वदेकपरएवसइत्याह॥ पक्षिणिवृक्षाद्भूमौपततिसति पत्रेचवातादिनाचलतिसति शंकितं भवत्त्वउपयानंसमीपागमनंयया ॥ तस्मात्त्वयाशय्यानिर्मीयते॥ तथासचकितनयनंयथास्यात्तथात्र्यागत्यकेनपथागतेतितवपंथानंपश्यति॥ ३ गत्वाहं किंकरोमि ॥ हेसखिमंजीरंत्यजकुंजेचल। कथंभूतं रत्यर्थं। मुखरमधीरंअनवसरेआतंकापादकशब्दायमानं। तथाकेलो सुलोलंअनवस्थितत्वाद्गमनविरोधि। अतः सर्वथाभीष्टविरोधित्वाद्रिपुमिव। कीदृशेकुंजे। तिमिरपुंजेनसहवर्त्तमाने।

पततिपतत्रे विचलतिपत्रे शंकितभवदुपयानं। रचयतिशयनंसचकितनयनंपश्यतितवपंथानं॥ ३ ॥
मुखरमधीरंत्यजमंजीरंरिपुमिवकेलिसुलोलं। चलसखिकुंजंसतिमिरपुंजंशीलयनीलनिचोलं॥ ४ ॥
उरसिमुरारेरुपहितहारेघनइवतरलवलाके॥ तडिदिवपीतेरतिविपरीतेराजसिसुकृतविपाके॥ ५ ॥
विगलितवसनंपरिहृतरसनंघटयजघनमपिधानं। किशलयशयनेपंकजनयनेनिधिमिवहर्षनिदानं॥ ६ ॥

॥ त्वंगमनासासादितात्मदृष्टिशंकावारणायनीलनिचोलंपरिधेहि॥ ४॥ गमनानंतरसौभाग्यकथनेनप्रोत्साहयति। हेगौरांगि विपरीतरतौमुरारेरुरसिराजिष्यसि॥ कीदृशे॥ उपहितोर्पितोहारोयत्र पुनः कीदृशे। सुकृतस्यफलरूपे। कस्मिन्केव ॥ चंचलावकपंक्तिर्यत्रतस्मिन् घनेविद्युदिव॥ ५॥ तत्प्रकारमाह॥ हेपंकजनयने किशलयशयनेकृष्णेनहेतुनाविगलितंवसनं यस्मात्तज्जघनंघटय। तेनैवदूरीकृतारसनायस्मात् अतएवापिधानमावरणरहितं। ततश्चतस्यैवहर्षनिधानं। कमिव। निधिमिव। निःस्वस्यनिधिदर्शनमिवहर्षजनकमित्यर्थः॥ ६॥

वं २

२८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं श्रीत्साहितां राधां प्रकारांतरेण त्वरयति ॥ हरिरिति शयेन त्वां मानयितुं शीलं यस्य सः । त्वदेकपर इत्यर्थः । अतिमानी अभिमानी त्वं
त्वं अस्याभिसारशंकामप्यापादयति । इयं प्रत्यत्ततो हन्यमाना रजनिरिदानीमेवावसानं यातीति भावयति । तस्मान्मम वचनं सत्वरर
चनापरिपाटीयत्र तद्यथा स्यात्तथा कुरु । किंतत् । मधुरिपोर्मनोरथं पूरय ॥ ७ ॥ कृतहरिसेवे श्रीजयदेवे परमरमणीयं भणति
सति भोः माधवः प्रमुदितहृदयं यथा तथा हरिं नमत । कीदृशं । अतिसदयं अतः शोभनचरितेन कमनीयं सर्वैर्वाञ्छितं ॥ ८ ॥

हरिरतिमानी रजनिरिदानीमियमपि याति विरामं । कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामं ॥ ७ ॥ श्रीज
यदेवे कृतहरिसेवे भणति परमरमणीयं । प्रमुदितहृ दयं हरिमतिसदयं नमत सुकृतकमनीयं ॥ ८ ॥ वि
किरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति ॥ रचयति मुहुः शय्यां प
र्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते ॥ २ ॥

अथातिशीघ्रमभिसारयितुमत्युत्कंठितप्रियङ्ःखमेवाह ॥ हे कांते तव प्रियो मदनकदनक्लांतः सन्वर्तते ॥ कदनमेवाह
॥ नागतेयं सा प्रियेति मुहुर्वारं वारं श्वासान्विशेषेणोत्सृजति । अधुना गमिष्यतीत्यग्रे दिशो मुहुरीक्षते ॥ कदाचिदन्येन पथा
गत्य तिष्ठतीति मुहुः कुंजं प्रविशति ॥ कुंजं प्रविश्य तामप्राप्य कथं नागतेति मुहुरव्यक्तशब्दं कुर्वन्बहु यथा स्यात्तथा ताम्यति
॥ मयि दृढानुरागेयं सा सांप्रतमेवागमिष्यतीति मुहुः शय्यां रचयति । मंचित्तजिज्ञासार्थं कदाचिन्निलीयास्तीति पर्याकुलं यथा
स्यात्तथा मुहुरीक्षते ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



पुनस्त्वरयितुं संध्यासेवागमनं सांप्रतमिति समयानुकूल्यमाह ॥ त्वद्दाम्येनवेषरचनादिव्याजेन सहगमनविरोधी सूर्य्योप्यस्त
मग्रमस्तंगतः॥ केवलं सूर्य्य एवनास्तंगतस्त्वद्दाम्यमनीति दिवसोतिकष्टेन नीतो रात्रिस्तु निमेषमात्रो शक्यगमनांतो वचन
विलंबोपिनोचितइत्युदीर्घ्यसमयानुकूल्यमप्याह ॥ गोविंदस्य मनोरथेनाविच्छिन्नसमृर्ध्यमाणतया धैर्य्यान्मूलकामिलाषे
णचसहतमोंधकारोनिविडतां प्राप्तः॥ तमएवनगोविंदमनोरथोपिनैविडं प्राप्त इत्यर्थः। विपक्षेबाधकमाह॥ चक्रवाक

त्वद्दाम्येनसमं समग्रमधुनातिग्मांशुरस्तंगतो गोविंदस्य मनोरथेन च समं प्राप्तं तमः सान्द्रतां । कोका
नोकरुणस्वनेनसहशी दीर्घामदभ्यर्थनातन्मुग्धे विफलं विलंबनमसौरम्योभिसारःक्षणः ॥ ४ ॥

नोकरुणस्वनेनसहशीमदभ्यर्थना च युवयोर्ईशां विलोक्य संप्राप्तदैन्यादीर्घा जाता कृष्णवागथवाद्वितीयमभ्यर्थनात्कोक
स्वनसदृशीत्यर्थः॥ तत्तस्मात् हेमुग्धे विचाराक्षमेऽज्ञे विलंबनं विफलं यतो सौ क्षणोभिसाररम्यः। प्रियतमउत्कंठितः। र
म्यश्वाभिसारक्षणः। चिरमभ्यर्थनपराङ्मुखी तथापिवेशादिव्याजेन गमनविलंबनमितिभावः ॥ ४ ॥ ४ ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ शीघ्रमभिसारयितुं गोविंदस्य मनोरथनैविध्यमेव विवृणोति । दंपत्योर्निगूढतरानुरागोद्रेकोल्लंघितेतरापेक्षयोर्वाल्ययो
र्व्रीडाविमिश्रः स्वयं प्रणयमानरोषादियुक्त्यानुनयादिमंतरेण स्वयमेव मिलनात्स्लाघवतामाकलय्य सखीहास्यपात्रं भवाव इति
या व्रीडा लज्जा तया विमिश्रः संवलितो रसः आलिंगनादिरूपः शृंगारः को न को नाभूदपितु सर्व एव पूर्वकालीनो मेघैर्मेदुरेत्या
दुक्त्वा गाढांधकारे यथाभूत्तथा इहतमस्यपि किं स्यात् ॥ इति गोविंदस्य मनोरथकथनेनाभिसाराय श्रीराधिकाया अत्यंतप्रो
त्साहनमुक्तं । पूर्वकालीनानुभवमेवाह ॥ कीदृशो ॥ अन्यार्थगतयोः । अन्य आश्लेषादिविरोधी मानस्तदर्थं ॥ आकस्मिकम्

आश्लेषादनुचुंबनादनुनखोल्लेखादनु स्वांतजप्रोद्बोधादनु संभ्रमादनुरतारंभादनुप्रीतयोः ॥ अन्यार्थगतयो
र्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥ ५ ॥ ॥ ॥

नोन्नाता न्निज निजगौरववरद्यार्थं गतयोरु भरेण विस्मृततरोचितकरणीयतयानवस्थितचित्तं प्रस्थितयोः । ततो भ्र
मात् भ्रमणं विधाय वनभ्रमणे कस्मात् संकेतीकृतकुंजवसतिसमीपप्रदेशागमनान्मिलितयोः ॥ संभाषणैस्तत्कालोचिताल
पैर्जानतोः ततः प्रथमं सर्वांगीणांगसंतापनिर्वापकालिंगनात् । तदनु चुंबनात् । तदनु नखोल्लेखनात् । तदनु कामस्य प्रकाश
नात् ॥ तदनु संभ्रमात्तत्कालोचितावेगात् । तदनु रतारंभादनु प्रीतयोः मत्त एवं वश दैवानुकूल्येन चेत्तथैवाद्य स्यात्तदैवेह
गपराधिनो मम प्रणयिनीप्रसादपात्रस्यादतन्योपाये विमृश्यापि नालोचयामीति गोविंदस्य मनोरथनैविध्यं प्राप्ते नवकौवा
वाम्पत्नावकाशः कथं वा विलंबो युक्त इति भावः ॥ ५ ॥

ता १ त्कं छाति ६

Dr. Urmila Sharma Collection, Varanasi

एतच्छ्रुवणव्यग्रतयागमनसम्मतिमालक्ष्यगमनप्रकारं कथनेनोत्साहयति ॥ हेसुमुखिमानापगमेनप्रसन्नवदनेत्वत्प्रणयलब्धसौभाग्यः सश्रीकृष्णः त्वांपश्यन्कृतार्थोभवतु ॥ कीदृशी ॥ अनंगतरंगिभिरंगैः कथमपिरहः प्राप्नोतत्प्रकारमाह ॥ सभयचकितं यथास्यात्तथापथितिमिरेनेत्रेविन्यस्यंती ॥ केनचित्कुत्रचित्तिष्ठतादृश्येहमितिनेत्रस्पंभयचकितं त्वं ॥ अतःप्रतितरुतरौतरौ इत्यर्थः ॥ स्थित्वा ॥ कियद्दूरेकुत्रास्तिप्रिय    इतिमंदंशनैःशनैर्दीर्विल्पा छीप्युगमनाशंक्यापदा

सभयचकितं विन्यस्यंती दृशौ तिमिरे पथिप्रतितरु मुहुः स्थित्वा मंदं पदानि वितन्वती । कथमपिरहः प्राप्ता मंगैरनंगतरंगिभिः सुमुखि सुभगः सत्वांपश्यन्नुपैतु कृतार्थतां ॥ ६ ॥ राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्नमवनीभारावतारांतकः ॥ स्वच्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुस्त्वां देवकीनंदनः ॥ ७ ॥

वितन्वती ॥ २ ॥ एवंश्रीराधायाः संकेतगमनप्रसंगं निरूप्य तयोर्मिलनकालस्फूर्त्या सहर्षमाशास्ते ॥ देवकीश्रीयशोदातस्यानंदन    स्त्वांचिरमवतु । द्वेनाम्नीनंदभार्याया यशोदादेवकीतिचेतितंत्रोक्तेः ॥ तदेवद्रढयति ॥ श्रीराधायामनोहरमुखकमलस्यमधुपः ॥ अत्रस्त्रैलोक्यमौलिस्थल्याः श्रीवृंदावनस्यालंकारयोग्यंनीलरत्ने । ततएवव्रजसुंदरीजनस्यमनस्तोषायरजनीमुखायमानः संतोषार्थमभिसारोद्यतइत्यर्थः ॥ नकेवलेतत्सुखार्थोद्यतोपितुसर्वसुखायकंसध्वंसनधूमकेतुः तथावनेः सुखार्थंतद्भारावतारायांतकः ॥ ७ ॥  ३०

तन्मन १

CC0. In Public Domain, Digitizagtion by eGangotri



अत एव श्रीराधिकागमनाकांक्षया सहितः पुंडरीकाक्षो यत्रैं इति सर्गः॥ ० ॥ इति बालबोधिन्यां पंचमः सर्गः॥ ५ ॥
॥ ॐ ॥ एवं विधयत मदेकल्पमवलोकन दशमीदशोन्मुखीमिव । तामालक्ष्य व्यग्रा सखी पुनरागत्य श्रीकृष्णं प्राहेति तस्याव
सकसज्ञावस्थां वर्णयिष्यन्नाह॥ अथ गमनोद्यमानेतरे तेते । चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे सखी प्राह॥ य
द्येवं तर्हि कथं नागच्छति । गंतुमशक्तां तर्हि कलः कथं नागतः । मनसिजेन प्रियार्तिश्रवणजमनोदुःखेन निरुत्साहिकृते । स्वव

इति श्रीगीतगोविंदे अभिसारिकावर्णने साकांक्षपुंडरीकाक्षो नाम पंचमः सर्गः॥ ५ ॥ ॐ ॥ अथ तां गंतु
मशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखी प्राह ॥ १ ॥ गौंडकीरागे रूपकताले ॥
पश्यति दिशि दिशि रहसि भवंतं । तदधरमधुरमधूनि पिबंतं ॥ १ ॥ नाथ हरे सीदति राधा वासगृहे ॥ ध्रुवं ॥

सकवशात् कांते समेष्यति निजं वपुः सज्जीकरोति गेहं च यासा वासकसज्जिकेति वासकसज्जालक्षणं ॥ १ ॥ तच्चरितमेवा
ह॥ हे नाथ अनुचितकारित्वेपि स्वामितयोपालभनीय॥ हरे राधामनोहारिन् ॥ राधावस्थामाकर्णापि प्रस्तुवद्विवेकशून्येते
कंपदेवा । राधा वासगृहे सीदति प्रतिक्षणं विलक्षणावस्थाकुला भवति ॥ ध्रुवं ॥ तत्प्रकारमाह ॥ सा सर्वासु दिक्षु यावंति रह
ःस्थानानि तेषु भवंतमेव पश्यति । कीदृशं । तस्या अधरस्यातिलोलुपतां जनकानि मधूनि पिबंतं ॥ त्वन्मयं जगदभूत्तस्याः त्वेत
मनसा चिंतदृशां नानुसंधत्से इत्यविवेकित्वमत्रापि सूचितं ॥ १ ॥ मधुर १

Dr. Urmila Sharma Collection, Varanasi

३१

यद्येतादृशी तत् कथं नायातीत्याह ॥ त्वदभिशरणोत्साहेन वलंती व्याघ्रुयमाना कृतसखीहस्तावलंबा कियंति पदानि चलंती गम
नोत्सुका सत्यजंती पतति ॥ गंतुमशक्यत्वान्नायातीत्यर्थः ॥ २ ॥ तर्हि कथं जीवति । सा केवलं तव रतिकलया त्वत्कर्तृकरमण
स्फूर्त्यावेशेन जीवति ॥ अतस्त्वत्संतापभीत्या कृता मृणालानां पल्लवानां च कंकणा यया ॥ ३ ॥ तत्स्फूर्तिविवर्त्तमेव जीव
ने हेतुरित्याह ॥ मुहुर्वारं वारमवलोकिता मंडनेन त्वच्छिन्नवर्हगुंजादिभिः । कृतत्वत्सदृशवेशावेशेन तवानुकृतिर्यया
॥ अत एव मधुरिपुरहमिति भावनपरा त्वन्मयात्मनः स्फूर्त्यैत्यर्थः ॥ प्रियानुकरणं लीलेति । तल्लक्षणं ॥ ४ ॥ स्फूर्त्यपग

त्वदभिसरणरभसेन वलंती । पतति पदानि कियंति चलंती ॥ २ ॥ विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥ ३ ॥ मुहुरवलोकितमंडनलीला । मधुरिपुरहमिति भावनशीला ॥ ४ ॥
त्वरितमुपैति न कथमभिसारं । हरिरिति वदति सखीमनुवारं ॥ ५ ॥ श्लिष्यति चुंबति जलधरकल्पं । हरिरुपगत
इति तिमिरमनल्पं ॥ ६ ॥ भवति विलंबिनि विगलितलज्जा । विलपति रोदिति वासकसज्जा ॥ ७ ॥ श्रीजयदेवकवे
रिदमुदितं । रसिकजनं तनुतामतिमुदितं ॥ ८ ॥

मे स्वात्मानं पृथक्कृत्वा द्रुतमभिसारं हरिः कथं नोपैतीत्यनुवारं वारं वारं सखीं मोघ प्रति उ
न्मत्तेवोत्तरमनाकर्णयेतीवदति ॥ ५ ॥ पुनस्त्वयि स्फुरति सति श्रीकृष्णोयमागत इति कृत्वा मेघतुल्यं घनतरमंधकारं क्वचित् श्लि
ष्यति क्वचिच्चुंबति ॥ ६ ॥ पुनस्तदपगमे त्वयि विलंबिनि सति विगलितलज्जा विलपति । वासकसज्जावस्था प्राप्ता रोदिति ॥ ७ ॥
श्रीजयदेवकवेरिदमुदितं शृंगाररसभावितांतःकरणमतिशयेन मुदितं करोतु । अनेन शृंगाररसविशि ष्टभक्त्यैवेदमास्वादनी
यमित्यर्थः ॥ ८ ॥

प१ ३१

CC0. In Public Domain, Digitizagtion by eGangotri



ल ३

त्वसख्याः स्मरणव्याकुलासेर्ष्यमिवाह। हे कितव राधावंचनचातुरीसुभगंमन्य। अविदितत्वत्कैतवा मृगाक्षी। मदर्थं मन्मथव्यथया प्रियः सीदति किं करोमीत्यादि अमंदकंदर्पचिंतां हृदि कृत्वा तव रससमुद्रे मग्ना बभूव॥ मनोरथसमुद्रे मग्नं त्वामुद्धर्तुमित्यर्थः॥ चेत् समुद्रमग्नालंबनं विना कथं जीवति। ध्यानमग्ना। समुद्रमग्नो यथा काष्ठाद्यवलंबते तथेयमप्युपायांतराभावात् ध्यानलग्नेत्यर्थः॥ ध्यानप्राप्तसंगममविकारमाह॥ विपुला रोमांचपंक्तिर्यस्याः। तथा स्फीतसीत्कारं यथा स्यात्तथा अभ्यंतरे ज

विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती॥ तव कितव विधायामंदकंदर्पचिंतां रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी॥ २॥ अंगेष्वाभरणं करोति बहुशः पत्रेपि संचारिणि प्राप्तं त्वां परिशंकते वितनुते शय्यां चिरं ध्यायति॥ इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति॥ ३॥

नितो योसौ जडिमा जाड्यं तेन जाता या काकुस्तया व्याकुलं च यथा तथा व्याहरंती। जलधिमग्नस्यापि जाड्यादयो भवंतीत्यर्थः॥ २॥ पुनः श्रीकृष्णेत्वरयितुं तस्या वासकसज्जाचेष्टितमाह॥ श्रीकृष्णो मामेवं पश्यन्मोदमना भवेदित्यंगेष्वाभरणं बहुशः करोति। नागत इति त्यजति पुनः करोतीत्यनेनाकल्पः। पत्रेपि पक्ष्यादिना संचारिणि सति प्राप्तमागतं त्वां परिशंकते॥ अनेन विकल्पः॥ आगत्यात्र श्रीकृष्णः शयिष्यतीति शय्यां वितनुते। अनेन तल्परचना। चिरं ध्यायति। त्वत्संगमरसं स्मरति॥ अनेन संकल्पलीलाशतं। इत्यनेन प्रकारेण कल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि वरतनुरेषा त्वया विना निशां न नेष्यति॥ ३॥

विकल्प १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अथ कविरेतद्वर्णनव्याकुलस्तस्याअभिसारानंतरचरितं कथयन्नाह ॥ गोविंदस्य गिरो जयंतीति ॥ राधिकाया मनोरथं पूरकत्वेनत्यर्थ
ः। कीदृशस्य ॥ श्रीनंदस्य समीपे पथिकस्य मुखात् ॥ श्रीराधायास्तद्वचनं गोपयतो गोपायतः। किं तद्वचनं ॥ हे भ्रातः पथिक भां
डीरनामतरुतले किं विश्राम्यसि विश्रामं मा कुर्वित्यर्थः। कुत्र ॥ कृष्णभोगिनः कालसर्पस्य शयनस्थाने। पक्षे संभोगशीलस्य
श्रीकृष्णस्य ॥ तर्हीदानीं क्व यामि। नंदस्यास्पदं गृहं किं न यासि ॥ कीदृशं ॥ आनंदेन सह वर्त्तमानं। कति दूरे ॥ इतस्थानाद् दृष्टिगोच
रं ॥ इतो दृश्यत इत्यर्थः ॥ कीदृश्यो गिरः। सायंकालातिथिरूपस्यैव प्राशस्त्यं प्रशंसा हि रूपं तदेव गर्भोभिप्रायो यासां ताः ॥ ४ ॥

किं विश्राम्यसि कृष्णभोगिभवने भांडीरभूमीरुहि भ्रातर्यासि न दृष्टिगोचरमितः सानंदनंदास्पदं ॥ राधाया व
चनं तदध्वगमुखान्नंदांतिके गोपतो गोविंदस्य जयंति सायमतिथिप्राशस्त्यगर्भा गिरः ॥ ४ ॥ इति श्रीगीतगो
विंदे वासकसज्जावर्णने धृष्टवैकुंठो नाम षष्ठः सर्गः ॥ ६ ॥ ❁ ॥ अत्रांतरे च कुलटाकुलवर्त्मपातसं
जातपातक इव स्फुटलांछनश्रीः ॥ वृंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः ॥ १ ॥

अतएव धृष्टः प्रगल्भो वैकुंठो यत्र स इति सर्गः ॥ ❁ ॥ इति बालबोधिन्यां षष्ठः सर्गः ॥ ❁ ॥ श्रीकृष्णस्यानागमनेकारणमा
ह। अत्रांतरे श्रीकृष्णस्यातिथिसेवावसरे इंदुः किरणसमूहैर्वृंदावनांतरमदीपयत् ॥ कीदृशः ॥ दिक्पूर्वा सैव सुंदरी तस्या वद
ने चंदनबिंदुः। पुनः कीदृशः। प्रकटीभूता कलंकस्य श्रीर्यस्मिन् तत्रोत्प्रेक्षते। कुलटानां कुलस्य वर्त्म विरोधेन संजातं यत्
पातकं पातकाज्जातो रोगविशेषो यस्य स इव ॥ यः खलु पातकी भवति स रोगविशेषचिह्नितो भवतीत्यर्थः ॥ १ ॥ ॥ ३२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्कण्ठितावस्थामाह ॥ शशधरबिंबे प्रसरति माधवे च विहितविलंबे सति सा विधुरा कृष्णागमनाद्दीना सती काकुला उच्चैः
कृतो नानाप्रकारो विलापो विविधशंकारूपो यत्र तद्यथा स्यात्तथा परितापं परितप्तं तेह वृष्णीतारो यत्र तं विलापं च कारेत्यर्थः
॥ २ ॥ परितापमेवाह ॥ हे इति स्वगतसंबोधने इह समये कं शरणं यामि ॥ सखी शरणं याहि । सखीजनस्य तत्रापि अभिव्यंजक
मिथ्यावचनेन वंचिता प्रतारिता ॥ ध्रु ॥ तद्वचनं व्यनक्ति । कथितसमये सखीद्वारा कथितागमनसमये यस्माद्दहह हरिर्वने

प्रसरति शशधरबिंबे विहितविलंबे च माधवे विधुरा । विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ २ ॥
मालवगौडरागे यतिताले ॥ कथितसमयेऽपि हरिरहह न ययौ वनं । मम विफलमिदममलरूपमपि यौवनं ॥ १ ॥
यामि हे कमिह शरणं सखीजनवचनवंचिता ॥ ध्रु ॥ यदनुगमनाय निशि गहनमपि शीलितं । तेन मम हृदय
मिदमसमशरकीलितं ॥ २ ॥

हरिर्मन्मनोहरणशीलः मन्मनोहर्तेत्यर्थः ॥ वनमपि न ययौ कुतो आगमिष्यती
त्यर्थः । तस्मान्ममेदं रूपं यौवनमपि व्यर्थं ॥ प्रियेषु सौभाग्यफलं हि यौवनस्येत्यर्थः ॥ १ ॥ न केवलमद्य एव प्रथमतो पेतामि
रेवापाद्वितीयमनर्थमित्याह ॥ यस्यानुगमनाय निरंतरसंगमाय त्वच्चेदापं तदनुरागादभिसृतः यासामसृतवाक्यान्नि
शि वनमपि सेवितं तेन कृष्णेन हेतुना मम मूढाया इदं हृदयं सखीवाक्यात्ततो कामबाणानां कीलितं विद्धं ग्रहोकष्टमित्यर्थः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

एवंसखीषुदोषमारोप्यस्वनिर्वेदमाह॥ अतोममभरणमेवपुनरस्तुनत्वादिप्रसादाद्वरंश्रेष्ठं॥ तत्रहेतुः। अतिवितथंव्यर्थंके
तनंदेहोयस्याःसाअचेतनाविवेकशून्याविरहानलंइहवनेकिंकिमर्थंविषहामिधैर्येणोल्लासंकदर्थयामि। अरण्यरुदितव
त्कश्चिद्त्राताऽपिनास्तीत्यर्थः॥२॥ नकेवलमत्रनागतइतिचंचलचित्तःकामप्यन्यामभिसृतइत्याह॥ कापिकृतसुकृतका
मिनीहरिंअनुभवति। तेनसहकेलिसुखमित्यर्थः। मांतुपरमसुखरूपावसंतनिशाअहहखेदेविकल्पयतियामिनीशादूर
स्थमपिप्रियंसंगमयतिसुकृताभावात्सैवमांआकुलयतीत्यर्थः॥४॥ ज्ञात्वाऽपिमयानुचितंकृतमित्याह। अहह

ममभरणमेववरमतिवितथकेतना। किमिहविषहामिविरहानलमचेतना॥२॥ मामहहविधुरयतिमधु
रमधुयामिनी। कापिहरिमनुभवतिकृतसुकृतकामिनी॥४॥ अहहकलयामिवलयादिमणिभूषणं। हरिवि
रह दहनवहनेनबहुदूषणं॥५॥ कुसुमसुकुमारतनुमतनुशरलीलया। स्रगपिहृदिहंतिमामतिविषमशीलया॥६॥

खेदे। तत्करकल्पितवलयादिमणिभूषणंमयाऽपिनिर्लज्जयाधारयामि॥ कथंनिर्लज्जता। हरिविरहएववह्निस्तस्यधारणेन
बहुनिर्दूषणानियत्र। प्रियावलोकफलोहिस्त्रीणांवेषइत्युक्तेः॥५॥ किंवन्यमन्यभूषणंनोनतत्रीत्याहहृदिधृताऽपिपुष्प
मालाऽपिमर्मभेदककामबाणक्रीडयामांहंति। नहितच्छेपोसहस्त्व। कुसुमतोऽपिसुकुमारातनुर्यस्याःततसहनसामर्थ्यम
पिनास्तीत्यर्थः॥ कीदृश्या। अतिविषमःस्वभावोयस्याः। अन्योहिबाणःहतंकृत्वाव्यथयतिकामबाणस्तुविध्यन्नेवहंतीतिविष
मशीलत्वं॥ ६ ॥ ॥ ३२

CC0. In Public Domain, Digitizagtion by eGangotri

गुर्जरी

मम मूर्खतैवावशिष्टेत्याह ॥ भीतिमपवगणय्यात्र भयंकरवने तदागमाकांक्षयाहं तिष्ठामि । मधुसूदनोऽस्थिरसौहृदो मां चेतसा
पि न स्मरति ॥ कीदृशी ॥ न विगलितं वनं वेतसकुंजं यया ॥ ७ ॥ हरिचरणे शरणे यस्य तस्य जयदेवकवेर्भारती हृदि वसतु ।
कस्मिन्निव । युवतौ हृदि युवतिरिव ॥ कीदृशी ॥ कोमलामाधुर्यगुणयुक्ता ॥ पक्षे मृदंगीकलावलीकवित्वशालिनी च सा ॥
पक्षे रतिकलायुक्ता ॥ ८ ॥ पूर्वोक्तं विकल्पं विवृणोति ॥ संकेतीकृतमनोहरवाणीरलताकुंजे कांतो यन्नागतस्तस्मात्काम
विभ्रमेण नवप्रेमानुबंधबंधुरामभिसृतस्तदभिसारे गतः । मय्येव दृढानुरागो सौकथमन्यामभिसरिष्यतीति विचिंत्य वि

तु ।
अहमिह निवसामि न विगलितवनवेतसा स्मरति मधुसूदनो मामपि न चेतसा ॥ ९ ॥ हरिचरणे जयदेवकविभा
रती । वसतु हृदि युवतिरिव कोमलकलावती ॥ ८ ॥ तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्ब
द्धो बंधुभिरंधकारिणि वनाभ्यर्णे किमुद्भ्राम्यति ॥ कांतः क्लांतमना मनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृत
मंजुवंजुललताकुंजेऽपि यन्नागतः ॥ २ ॥

तर्कांतरमाह ॥ किं वा मित्रैः क्रीडाकौतूहले निरुद्धः कृताभिसारसमये
स्मिन्स तदपि न संभवतीति विचिंत्य वितर्कांतरमाह । मामभिसरन्नेव बंधुतरुतया गाढांधकारिणि वनसमीपे किमुद्भ्राम्यति ॥
चतुरशिरोमणेः सहस्त्रशो नु भूतस्थलभ्रमः कथं स्यादिति विचिंत्य वितर्कांतरमाह । क्लांतेन मद्विरहेण चंद्रोदयानंतरेत
स्याः कीदृशा भवेदिति चिंतया चोपतप्तमनो यस्य ॥ पथि प्रस्थातुं पदात्पदमपि दातुमसमर्थ एव नागतः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

चंद्रोदयेन श्रीकृष्णागमनप्रतिबंधे सति तं विनागतसखीदर्शनोद्दिप्तां तस्या विप्रलब्धावस्थां वर्णयितुं वितर्कांतरमाह । अथागतेंत
रं माधवं विनागतां सखीं वीक्ष्य श्रीराधा ऽतद्व्यामाणमाह ॥ कीदृशी ॥ दुःखातिशयेन वक्तुमसमर्था । अकृतकार्यत्वात्
। कीदृशी । जनार्दनं कयापि कर्तृभूतया रमितं दृष्ट्वैव विशंकमाना ॥ विप्रलब्धालक्षणं यथा ॥ अहरहरनुरागाद्दूतिकां
प्रेष्यपूर्वं सरभसमुपयाति क्वापि संकेतकं या ॥ न मिलति खलु यस्या वल्लभो दैवयोगाद्वदति हि भवतस्तां नायिकां विप्रल

अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह
॥४॥ वसंतरागेण यतिताले ॥ स्मरसमरोचितविरचितवेशा । गलितकुसुमदरविलुलितकेशा ॥१॥ कापि म
धुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रु ॥ हरिपरिरंभणवलितविकारा । कुचकलशोपरि तरलितहारा

ब्धामिति ॥४॥ किमेतदित्याह ॥ हे सखि कापि युवतिः मधुरिपुणा सह विलसति । तत्र हेतुः । मत्तोप्यधिकाः प्रौढगुणा यस्याः ।
अधिकेत्यनेन मत्संकेतमागतेपि गुणैर्वशीकृष्य विलसतीति गुणाधिक्यं । तेन सहेत्यनेन तत्कर्तृकरमणं च ध्वनितं ॥ ध्रु ॥ रतिप्रौढिं पुरु
षायितेनापादयति । कामसंग्रामस्य कामवाक्युद्धस्य उचितः कृतो वेशो यया । तस्युद्धविशेषमाह । तदावेशेन विग लिता नि कुसुमा
नि येभ्यस्ते त्यविलुलिताः केशा यस्याः । अनेन लाविशेषः सूचितः ॥१॥ लीलाविशेषमेव व्यनक्ति । हरेः परिरंभणेन वलितो रो
मांचादि विकारो यस्याः । ततश्च कुचकलशयोरुपरि तरलितो हारो यस्याः ॥ २ ॥

लौ२

तथातत्रैवमत्शिरोधुननेनविचलद्भिरलकैर्ललितः।कृष्णाह्लादकारीआननचंद्रोयस्याः।ततश्चकृष्णाधरपानरभसेनकृत
तंद्रानंदनिमीलनंयस्याः॥३॥तथाचतदधरपानावेशाच्चंचलाभ्यांकुंडलाभ्यांललितौकपोलौयस्याः।तेनैवमुखरितारस
नायत्रतस्यजघनस्यगत्यालोलाचंचला॥४॥ततश्चअग्रहृत्स्वरस्वकौशलजातहर्षात्दयितस्यविलोकितेनलज्जितातदुल्लास
त्हसिताच।तेनैवबहुविधंदास्यूहपारावतादिकूजितवत्रतिरसेरसितंशब्दितंयस्याः॥५॥अतएवविपुला॰

विचलदलकललिताननचंद्रा। तदधरपानरभसकृततंद्रा॥३॥ चंचलकुंडलललितकपोला। मुखरितर
सनजघनगतिलोला॥४॥ दयितविलोकितलज्जितहसिता। बहुविधकूजितरतिरसरसिता॥५॥ विपुल
पुलकपृथुवेपथुभंगा। श्वसितनिमीलितविकसदनंगा॥६॥ श्रमजलकणभरसुभगशरीरा। परिपतितो
रसिरतिरणधीरा॥७॥ श्रीजयदेवभणितहरिरमितं। कलिकलुषंजनयतुपरिशमितं॥८॥ ॥

पुलकाश्चपृथुवेपथुश्चतैर्भोतरंगायस्याः।तथाश्वसितंरत्यायासजनितनिश्वासः।निमीलितंपरमानंदजनेत्रमीलनंचताभ्यांवि
कसन्उन्नराविर्भवन्ननंगोयस्याः॥६॥रतिश्रांतिजघर्मबिंदुसंदोहेनसुंदरंकलेवरंयस्याः।ततश्चनिःसहतयाविस्मृतनिजांगा
नुसंधानतयाप्रियस्यवक्षसिपरिपतिता।यतःरतिरणेअकंठितोभटइवोद्धपाटवा॥७॥श्रीजयदेवेन भणितंहरिरमितंक
लिकलुषंक्रामादिक्लेशमितंजनयतु।नाशयत्वित्यर्थः।एततसर्वंस्वस्यांतत्पूर्वाचरितस्फूर्त्तिजैर्भयात्मन्यत्रारोपितं।एवमन्यत्रापि
यथायथमूह्यं॥८॥॥

CC0. In Public Domain, Digitizagtion by eGangotri





अथचंद्रंपश्यंतीतंश्रीकृष्णमुखत्वेनोत्प्रेक्षतअस्याविरहेण पांडुत्वस्फूर्त्यास्वस्यांतस्यातिप्रणयिनोस्मरंतीचंद्रमाक्षिपति। अयं विधुर्वेदनांनाशयन्नपिममहृदयेअयेखेदमदनव्यथांकृष्णमुखाभ्रस्फूर्तिपी मतीवतनोति। तत्रहेतुः। अन्ययासहरममाणस्यापिमद्विरहेणपांडुयन्मुरारिमुखांबुजंतद्द्युतिर्यस्य॥ कथंतांव्यथयति। मनोभुवःसुहृत्। मदनस्तत्रतांव्यथयतिमदनसुहृत्त्वेनचंद्रः कृष्णमुखस्मारकतयाचंद्रोमांव्यथयतीत्यभिप्रायः॥ ४॥ पुनस्तथैवतस्याः स्वाधीनभर्तृ

विरहपांडुमुरारिमुखांबुजद्युतिरयंतिरयन्नपिवेदनां॥ विधुरतीवतनोतिमनोभुवःसुहृदयेहृदयेमदनव्यथां॥ ४॥ गुर्जरीरागेयतिताले॥ समुदितमदनेरमणीवदनेचुंबनवलिताधरे। मृगमदतिलकंलिखतिसपुलकंमृगमिवरजनीकरे॥ १॥ रमतेयमुनापुलिनवने। विजयीमुरारिरधुना॥ ध्रु॥

कांतेवर्णयति॥ यमुनायाःपुलिनस्थवनेमुरारिरधुनाक्रीडति॥ कीदृशः। विजयी। मंडनादिकौशलेनसर्वातिशायी॥ ध्रुं॥ रमणप्रकारमाह॥ रमण्यावदनेतन्मुखस्पर्शोदितपुलकेनसहयथास्यात्तथामृगमदतिलकंलिखति। कस्मिन्कमिव॥ चंद्रेमृगमिव। कीदृशे। सम्यगुदितोनुकूलनायककरस्पर्शसुखेनाविर्भूतःकामोयत्र। अतएवाल्लासंवलिततच्चुंबनेनयुक्तोधरोयत्र॥ १॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नकेवलं तिलकं चिकुरे तरुणाननान पुष्पं च रचयति। तत्पुष्पैः कबरीं ग्रथ्नातीत्यर्थः॥ कीदृशं चपलाया विद्युत इव परमा शोभा यस्य। कीदृशे मेघपुंजवत् सुंदरे॥ अत एव स्वगुणवर्णनेन मुखरीकृततरुणस्य श्रीकृष्णस्यानंयेन। यतो रतिपतिरेव मृगस्तस्य सुखनिवासवने॥२॥ केल्यंतरमाह॥ महत्वाङ्गगनरूपे कुचयुगे मणिसरममलं तारकपटलं कुचस्पर्शलोभेन संश्लेषयति॥ कीदृशे। सुघने सुविविडे॥ तथा मृगमदरुचिमिश्र ष्विते। किंच। नखोकाएव शशी तेन भूषिते॥ एतैर्गगनसाम्यं॥ ३॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने। कुरुवककुसुमं चपलासुषमं रतिपतिमृगकानने॥ २॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते। मणिसरममलं तारकपटलं नखपदशशिभूषिते॥३॥ जित
विशशकले मृदुभुजयुगले करतलनलिनीदले। मरकतवलयं मधुकरनिचयं वितरति हिमशीतले॥४॥ र
तिगृहजघने विपुलापघने मनसिजकनकासने। मणिसा रसनं तोरणहसनं विकिरति कृतवासने॥ ५॥ ॥

तथा॥ मृदुभुजयुगले मरकत वलयमेव मधुकरनिचयमर्पयति॥ कीदृशे॥ जितानि मृणालखंडानि येन। करतलमेव नलिनीदलं यत्र। अत एव हिमवच्छीतले॥ ४॥ अथ च रतेर्गृहेऽस्याश्रये जघने मणिसारसनं विकिरति॥ तत्स्पर्शजातकंपतयाऽग्रंथ्या तथैव विन्यस्यतीत्यर्थः॥ कीदृशं॥ तोरणस्य मांगल्यस्रजो हसनमुपहासो यस्मात्॥ कीदृशे। विस्तीर्णे मपघनमंगं यस्य। तथा कामस्य स्वर्णपीठे॥ अतः कृता श्रीकृष्णस्य लीलाविशेष वासना येन॥ ५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri





अपरं च ॥ वहुतिथृते चरणपल्लवे यावकभरणं करोति । यतः सकलसौभाग्यनिदानभूताया लक्ष्म्या निवासे ॥ अतो नखास्यद्युम
णयस्तैः पूजिते ॥ श्रीनिवासस्य मणिगृहस्यावृतिर्भित्तिश्चेत्यर्थः ॥ ६ ॥ किंच । परं वं चक्रस्य हलधरस्य कृषीवलस्य सोदरे स हृशो
युक्तायुक्तविवेकशून्ये श्रीकृष्णे कामपि सुदृशं सुभृशं रमयति सति हे वनमध्ये विफलं किमिह मवसमि त्येतद्वद ॥ तज्ज्ञावा
नुवंध कथनेनेह ड्रम मानर्थमापाद्ये दानीं किं तूष्णीमसीत्यर्थः ॥ मामभिसार्य्यान्यायासहरमणो हरेर्युक्तायुक्तविचार

दृ २ विर २

चरणकिशलये कमलानिलयेन खमणिगणपूजिते ॥ वहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥
॥ ६ ॥ रमयति सुभृशं काम पिसुदृशं खलहलधरसोदरे ॥ किमफलमवसं चिरमिह रसं वद सखि विटपोद
रे ॥ ७ ॥ इहरसभणने कृतहरिगुणने मधुरिपुपदसेवके ॥ कलियुगचरितं नवसतुडरितं कविनृपजय
देवके ॥ ८ ॥ नायातः सखि निर्द्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदं वहुवल्लभः सरमते किं तत्र ते दूषणं ॥ ॥

भूयत्वं ॥ ७ ॥ इहैतत्काव्यकर्त्तरि कवीनां नृपजयदेवके कलियुगचरितं डरितं न वसतु ॥ तत्र हेतुः ॥ मधुरिपोः पदसेवके । अत एव
कृते हरेर्गुणने चिंतनं येन ॥ तत्रापि रसस्य शृंगारस्य भणने कथनं यस्य ॥ ८ ॥ । अथ श्रीकृष्णं विना तत्रागमन
विषण्णां सखीं प्रत्यति निर्व्विद्नाह । हे सखि हे दूतिसखी भूत्वापि मत्प्रीत्या दौत्यकर्म्मणि प्रवृत्ते निर्द्दयः निजैकाश्रयप्राणरक्षापरो गु
णः श । ठो नरस्य वहिरन्यत्कारी यदि नायातस्तर्हि त्वं किं दूयसे । मा व्यथस्वेत्यर्थः । तदानयनाशक्त्या दूये ॥ ॥ ॥ ३६

CC0. In Public Domain, Digitizagtion by eGangotri



वकुवल्लभः सनिःशंकं पूर्वोक्तप्रकारेण रमते तत्र कार्य्यं ते न वक्ति दूषणं न किमपि॥ तदागमनं विना चूर्णम पिस्यात् तु मशक्तां वीक्ष्य पुन
र्गन्तुमुद्यतां प्रत्याह॥ पश्याद्येदानीमेव दयितस्य मिलनाय इदं चेतस्तदप्राप्तिनापोज्झूलितधैर्य्यं। औत्कंठ्यात्माधिक्येन स्फुट
द्विवस्वयं यास्यति। तत्र हेतुः॥ गुणैराकृष्यमाणं। अन्योपि रज्ज्वाकृष्टो यातीत्यर्थः॥५॥ तद्गुणैरन्यस्याः सुखं गूढाभिप्राये
नाह॥ हे सखि या वनमालिना रमिता विविधसंभोगकेलिभिर्नद्धिता सा किशलयशयने न तपति। रसानुकूल्येन तत्सुख

पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्त्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति॥५॥ देशवरा
डीरागेरूपकंताले॥ अनिलतरलकुवलयनयनेन। तपति न सा किशलयशयनेन॥१॥ सखि या रमिता वन
मालिना॥ ध्रु॥ विकसितसरसिज खेण। स्फुरति न सा मनसिजविशिखेण॥२॥ अमृतमधुरतरमृदु
वचनेन। ज्वलति न सा मलयजपवनेन

ऽदमेवमभवेतीत्यर्थः॥ कीदृशेन। अनिलेन तरलेये नीलोत्पले तद्वन्नयने यस्य॥
तच्छीतलदृष्ट्या तापासंभवादित्यर्थः॥ तदाशयाहमेव तेन तपामीति भावः॥ या रमिता वनमालिना इति सर्वत्र योज्यं॥
ध्रुवपदं चैतत्॥१॥ विकसितसरसिजवत् तत्कालीनविलासोत्फुल्लं मुखं यस्य तेन या रमिता सा कामबाणेन विद्धा न भवति
॥ अहमेव तेन विद्धास्मीति भावः॥ तन्मुखशोभेक्षणविवशकामस्य बाणप्रयोगाशक्तेरित्यर्थः॥२॥ अमृतादपि मधुरतरमति
कोमलं नर्मालापादि यस्य तेन या रमिता सा मलयजपवनेन न ज्वलति अहमेव तेन ज्वलितास्मीति। अमृतसिक्तायाः ज्वालाप्रभवाभा
वादित्यर्थः॥ ३॥

चवचनं १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri





स्थलजलरुहवद्विरहसंतापहारिस्पर्शरुचिरौ करौ चरणौ च यस्य तेन यारमिता सा चंद्रकिरणेन भूमौ न परिवर्त्तते ॥ अहमे
व जालरंध्रप्रविष्टेनापि तेन तप्तास्मि ॥४॥ संतापनिर्वापकसजलजलदानां समूहादपि रुचिरेण यारमिता सा विरहभरेण
हृदि न विदीर्यते ॥ जलार्द्रितस्य विरहतापानुपपत्तेः। अहमेव तद्विदीर्णहृदयास्मीति ॥५॥ कनकस्य निकषपाषाणे
या रुचिस्तद्वद्वसनं यस्य तेन यारमिता सा परितो जनानां हसनेनैंश्वसिति। सौभाग्यमदेन कमपि न गणयतीत्यर्थः॥ अ

स्थलजलरुहरुचिकरचरणेन। लुठति न सा हिमकरकिरणेन ॥४॥ सजलजलदसमुदयरुचिरेण।
दलति न सा हृदि विरहभरेण ॥५॥ कनकनिकषरुचिशुचिवसनेन। श्वसिति न सा परिजनहसनेन ॥
॥६॥ सकलभुवनजनवरतरुणेन ॥७॥ श्रीजयदेवभणितवचनेन। प्रविशतु हरिरपि हृदयमनेन ॥
वहति न सा रुजमतिकरुणेन ॥१

हमेव तत्परिहासैर्निश्वासयुक्तास्मि ॥६॥ सकलभुवने युवजनापुवानसोपोवरः श्रेष्ठो यस्तरुणः किशोरस्तेन यारमि
ता सा अतिकरुणेन रसेन पीडां न प्राप्नोति ॥ जगद्दुर्लभतरुणप्राप्त्याशोकानुपपत्तेः॥ अहमेव रोदनादिना सखीः कदर्थ
यामि ॥७॥ अनेन श्रीजयदेवभणितेन श्रीराधाया माधवमुद्दिश्य वचनेन हरिरपि हृदये प्रविशतु ॥८॥ ॥ ॥ ३१



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अथास्तु त्वंगावेगेनानिलमेवोपलभते ॥ दैन्येनादौसाममाह ॥ हेमनोभवस्यानंददायकहेचंदनानिलपरो॑ कार निपर्थः। प्रसीदप्रसन्नोभव ॥ पुनरीर्ष्ययाभेदमाह ॥ रेदक्षिणसर्वानुकूलवामतांमुंच ॥ दक्षिणपथप्रवृत्तस्यवामपथ प्रवृत्तेरयु क्तत्वात् ॥ वामतात्यक्तातर्हिकिंविधेयं ॥ हेजगत्प्राणजगद्धितोपित्वमनोभवानंदनायचंदनतरुसंपर्काद्धिमस्त्वेमांमार सि। तदाममपुरःक्षणमपिमाधवंकृत्वापश्चान्ममप्राणहरोप्राणहंताभविष्यसि ॥६॥ अथनीरागेदयितेसरागंचित्तंनि

नः१

मनोभवानंदंचंदनानिलप्रसीदरेदक्षिणमुंचवामतां ॥ क्षणंजगत्प्राणनिधायमाधवंपुरोममप्राणहरोभवि ष्यसि ॥६॥ रिपुरिवसखीसंवासोयंशिखीवहिमानिलोविषमिवसुधारश्मिर्यस्मिन्दुनोतिमनोगते ॥ हृदयमद येतस्मिन्नेवंपुनर्वलतेवलात्कुवलयदृशांवामःकामोनिकामनिरंकुशः॥ ७ ॥

दंतीममैवायमपराधोनान्यस्येत्याह ॥ यस्मिन्कृष्णेचेतसिप्राप्तेपिसखीभिःसहैकत्रवासोपि रिपुरिवदुनोति ॥ स्वच्छंदगमना द्विपतिवेधात्। शीतलवायुरप्यग्निरिवदाहत्वात् ॥ सुधारश्मिरपिविषमिवतापकत्वात् ॥ तस्मिन्निर्दयेकांतेपुनर्यद्धिहृदय मेवमुक्तप्रकारेणवार्यमाणमपिवलात्संभक्तंभवतितर्हिस्त्रीणांकामोयमभिलासः अत्यर्थमयंत्रितः। अतोवामः। प्रतिकूलस्व। हिताहितविवेकापगमात्। तदसंयमनात्ममैवदोषइत्यर्थः॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सेशति विरहडःखमसहमाना प्राणोत्सर्गं कृतमतिराह ॥ हे मलयानिलपीडां कुरु। सविषयत्वेन बाधाविधानसामर्थ्यात्। हे पंचे
वाण प्राणान् गृहाण ॥ पंचवाणधारकत्वेन पंचप्राणग्रहणयोग्यत्वात्॥ हे यमस्य भगिनि तेन्वमया किं। त्वं कथं त्वमसे। यम
नुजायाः त्वमानयुक्ता ॥ तर्हि किं कर्तव्यं ॥ तरंगै रंगानिसिंच ॥ तेन किं स्यात् ॥ ममदेहदाहः शाम्यतु। दशमीदशां विधेही
त्यर्थः॥ कृष्णेन चेडपेक्षिता सि तर्हि गृहमेव किं न यासि ॥ न गृहं पुनराश्रयिष्ये। तेन विना गृहमपि संतापकमेव स्यादतो मर
तु।

वाधां विधेहि मलयानिल पंचवाण प्राणान् गृहाण न गृहं पुनराश्रयिष्ये ॥ किं ते कृतांत भगिनि त्वमया तरं
गै रंगानि सिंच मम शाम्यतु देहदाहः ॥ ८ ॥ प्रातर्नीलनिचोलमच्युतमुरः संवीत पीतांशुकं राधायाश्चकितं
विलोक्य हसति स्वैरं सखीमंडले ॥ व्रीडाचंचलमंचलं नयनयोराधाय राधानने स्मेरस्मेरमुखोयमस्तु जगदा
नं पनंदात्मजः ॥ ९ ॥

णमेव युक्तमित्यर्थः ॥ ८ ॥ अथैतद्दुःखवर्णनमसहिष्णुः कविः सिंहावलोकनन्यायेन साधा दा।
रणकेलिरात्रेः प्रातश्चरितवर्णनेन श्रीराधिकायाः खंडितावस्थां वर्णयिष्यन् श्रीराधामाधवयोः प्राकृतकेल्यनंतरावस्थितिमा
ह ॥ नंदात्मजो जगदानंदायास्तु ॥ तत्र हेतुः। स्वच्छंदं यथा स्यात्तथा सखीमं ले हसति सति व्रीडाचंचलं नय नयोरंचलं राधा
नने आधाय स्मेरस्मेरमुखः। कुतः सखीहासोपि। प्रभाते अच्युतं नीलनिचोलं चकितं वीक्ष्य राधाया उरश्च संवीतमुत्तरीकृतं पीतांशुकं
च तादृशं वीक्ष्य ॥ ९ ॥ ३८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अतः सर्गोयं नागरायेनारायनरसमूहात्तोषामयनं मूलमूतं यः सः श्रीकृष्णोयत्रसइति ॥ इति बालबोधिन्यां सप्तमः सर्गः ॥ ७ ॥
॥ ॐ ॥ तामवस्थामेवाह ॥ खंडिता लक्षणं यथा ॥ उल्लंघ्य समयं यस्याः प्रेयानन्योपभोगवान् ॥ भोगलक्ष्मांकितः प्रातरा
गच्छेत् खंडिता हि सा । इति । अथ बहुविध प्रलापानंतरं हरिविहरणोपदर्शी कललितलवंगेत्यादि सखीवचनश्रवणेन संचर
दधरेत्यादि स्वमनोरथकथनेन चातिकष्टेन रात्रिमतिवाह्य सा श्रीराधा प्रभाते अपि तः असूयासहितं यथा स्यात्तथाह । स्मरश
रैजर्जरिताक्षणमात्राति वाहन शक्तापि ॥ कीदृशं ॥ अग्रे अनुनय विनयं स्वापराधजनित कोपशमक वाक्यं वदंतं । नतोपि

इति श्रीगीतगोविंदे विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥ ७ ॥ ॐ ॥ अथ कथमपि यामिनीं वि
नीय स्मरशरजर्जरितापि सा प्रभाते । अनुनयविनयं वदंतमग्रे प्रणतमपि प्रियमाह साभ्यसूयं ॥ १ ॥ भैरवरागे यति
ताले ॥ रजनिजनितगुरुजागररागकषायितमलसनिमेषं । वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशं ॥ १ ॥

प्रसादम नालोक्य प्रणतं ॥ अनेन प्रेम्णः परमावधिर्दर्शितः । प्रियाप्राप्त्या कंठागतप्राणापि तद्दर्शनमात्रेणासूयोदयात् ॥ १ ॥
किमाह इत्याह ॥ हरिहरीति खिदे ॥ हे माधव याहि हे केशव याहि ॥ इतोपगच्छ ॥ कयामि ॥ हे सरसीरुहलोचन चंचकजीति मात्रे
ण मुग्धस्त्रीजनवंचनचतुर । या त्वत्तो पि वंचनचतुरा सहज प्रेमानुबंधान भिज्ञस्य तव विषादं कापह्ना पादितवैमनस्यं हरति तां
त्वच्चिंतानुरूपचतुरव्यापारामनुगच्छ ॥ माधवेति धवोनभवसीत्यमियत प्रियत्वं केशवेति प्रकृष्टकेशत्वं तेनोन्मुक्तकेशत्वे सर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सीरुहलोचनेत्य ॥ ईषन्मुद्रितनेत्रत्वेन च ध्वनितं । त्वदेकपरायणस्य ममान्यत्र गमनं न युक्तमिति वदंतमाह ॥ कैतववादं यस्य कस्यापि वोधार्हं कपटवाक्यं मा वद ॥ ध्रु ॥ ननु कैतवं ब्रुवे सत्यमेवान्यांगनासंगात् कृतपूर्वत्वद्विप्रियोहमिति प्रतिवचनमाशंक्याह । रजनिजनितेन गुरुजागररागेण कषायितं लोहितीकृतं तव नयनमनुरागं वहतीत्युत्प्रेक्षे ॥ तां प्रत्यनुरागश्चाचूर्ण्यान्तव हृदि स्थितिमविंदन् चक्षुषा निर्गत इत्युत्प्रेक्षार्थः । सहजमेवारुणं मे नयनं न जागरादित्याशंक्याह ॥ अलसो मंथरो निमे

हरिहरियाहि माधव याहि केशव मा वद कैतववादं । तामनुसर सरसीरुहलोचन या तव हरति विषादं ॥ ध्रु ॥
कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं । दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपं ॥ २ ॥

षो यत्र ॥ अननुभूतत्वक्व चनचिंतया निमेषमंथरत्वं न जागरात् ॥ कथितो रसस्याभिनिवेशो येन । यदि त्वं नान्यांगनासंगतस्तर्हि कथमेतदित्यर्थः ॥ एवमग्रेपि ॥ १ ॥ त्वदन्वेषणजागरान्नेत्ररागो न रतिजागरात् । हे कृष्ण सहजारुणं तवाधरः संप्रति तनोरनुरूपं अनुसादृश्यं सदृशरूपं श्यामतामित्यर्थः ॥ तनोति । तदेव व्यनक्ति ॥ कज्जलेन मलिनयोर्विलोचनयोश्चुंबनेन विरचितं नीलिमरूपं यत्र ॥ मलिनशब्दप्रयोगस्त्वीर्ष्यया । तवाधर एव तच्चरितं व्यनक्तीत्यर्थः ॥ २ ॥ ॥ ० ॥ ० ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



त्वच्चिंताशोकेन मलिनीयमधरोनत्वारीचुंबनेन ॥ ततसंभोगसुभगस्पतवतमनोरथपूरणानिपुनंशरीरं रक्ताक्षरपंक्तिसुंदरं
रतिजयलेखमनुहरति सदृशीकरोति । कीदृशं । अनंगरसोत्तदाशक्तिसूचकतीक्ष्णनखक्षतरूपाक्षे " पत्र ॥ कस्याइव ॥
मरकतमणिखंडे र्पितायाः कांचनद्रवलिखिताक्षरपंक्तिरिव ॥३॥ त्वदप्राप्त्यात्सीवनेधावतः कंटकैः क्षतंमेवपूर्णनारीनख
क्षतैरित्यत्रसोत्प्रेक्ष्यमाह ॥ इदंविद्यमानंतवहृदयंउदारंसुखदंदर्शनीयमित्यर्थः ॥ औदार्यमेवाह ॥ प्रेमोल्लसितोहृदि धृतच त्वा ।

वपुरनुहरति तव स्मरसंगररखरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं ॥
॥३॥ चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं ॥ दर्शयतीव बहिर्मदनद्रुमनवकिशलयपरिवा
रं ॥४॥ दशनपदं भवदधरगतं मम जनयति चेतसि खेदं । कथयति कथमधुनापि मया सह तव वपुरेतदभेदं ॥५॥

रणकमलगलदलक्तकेनसिक्तं ॥ तत्रोत्प्रेक्ष्यते । मदनद्रुमस्य हृदयांतर्गतनवपल्लवसमूहं बहिर्दर्शयतीव । त्वं केनवाक्षेपयसीन
हृदयमित्यर्थः ॥४॥ गैरिकचित्रितं मधुरो णांगनाचरणालक्तकाशिक्तं एतत्प्रत्यक्षं तववपुः कर्तृ अधुनापि मयासह ऐक्यं नावयोर्भे
दइति कथं कथयति । तत्कथनप्रकारमाह । भवदधरगतं दशनक्षतं मम चेतसि खेदं दुःखं जनयति । त्वदधरस्थितस्यमच्चिते
व्यथाजनकत्वादभेदोज्ञायत इत्यर्थः । नयनरागादिकं कज्जलमाच्छादितं इदं तु दृश्यत चंद्रकलावत्प्रकाशमानमितिभावः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सौरमधुव्रभ्रमरेण दष्टोयमधरोनात्रांगनादंतक्षतं। हेकृष्ण मलिनात्मन्॥ तवमनोपिबहिरिवमलिनं भविष्यतीति नूनमुत्प्रेक्षे ॥ अथेति प्रश्ने॥ अन्यथा कामशरपातित मनुगत मनुकूलं जनं कथं वंचयसे॥ सबलातः करणस्यनेयंरीतिरित्यर्थः॥६॥ तदेतन्मद्वचनेनापूर्वं स्वभावत एव भवान्स्त्रीषु निष्ठुरः॥ भवान्निर्दयतया प्रसिद्धः अबलाकवलायमदनपरवशानन्य शरणां कांतायैवनेषु निःशंकड्ढं क्रियाहिंस्यानेषु भ्रमतिअत्र किंचित्रं न किमपि॥ कृतोनेत्यत्रोदाहरणमाह। अकारण

बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं। कथमथ वंचयसे जनमनुगतमसमशरज्वरदूनं॥
॥६॥ भ्रमति भवानवलाकवलाय वनेषु किमत्र विचित्रं। प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रं॥७॥ श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं। शृणुत सुधामधुरं विबुधा विबुधालयतोपि
दुरापं॥८॥

स्त्रीवधेन वा निर्दयबालचरित्रं पूतनिकैव विस्तारयति। सर्वसमे बाल्ये येन स्तनदात्री राक्षसी निहता तस्य कैशोरे कोमलांगी नां वधः किंचित्र मित्यर्थः॥७॥ हे विबुधाः श्रीकृष्णलीलास्वादनपराः श्रीजयदेवभणितं रतिवंचितायाः खंडितायाः युवत्याः श्रीराधिकाया विलापं शृणुत॥ कीदृशं। सुधाया अपि मधुरं। अत एव विबुधालयतो दुर्लभं। राधाकृष्णोपासना विशे



षलभ्यत्वात्॥८॥ ४०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं सहजेनैव क्रूर्येणोपालभ्य पुनः स्फुटापराधत्वेनोपालभते। हे धूर्त त्वदालोको यद्दरति वा हन्निमेष दिवसे मम निर्निमित्त त्वदाग
मनप्रतीक्षिणः प्रसिद्धप्रेमातिशयभंगेन त्वद्वियोगदुःखादपि निर्वचनीयां जीवनमरणयोः संदेहापादिकां लज्जां जनय
ति ॥ तत्र हेतुः ॥ तदेवमरुणद्योति हृदयं पश्यंत्याः ॥ ततोपि कुतः। प्रियायास्तस्याः पादालक्तेन व्याप्तं तत्रोत्प्रेक्षते। प्रसर
दनुरागं बहिरिव ॥ तं प्रतिवृद्धिंगच्छन्ननुरागो हृदये स्थितिमविंदन् बहिर्निर्गत इत्यर्थः ॥ २ ॥ अथ श्रीराधिकायाञ्च

तवेदं पश्यंत्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणद्योति हृदयं ॥ ममाद्य प्रख्यातप्रणयभर
भंगोपि कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥ २ ॥ अंतर्मोहनमौलिघूर्णनचलन्मंदारविस्रंस
नस्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां ॥ दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंसः कंसरिपो
व्यपोहयतु वः श्रेयांसि वंशीध्वनिः ॥ ३ ॥

तिगाट मान एवं धमनुसंधाय तत्प्रशमनप्रवीनवंशशंसनेनाशास्ते। कंसरिपो ८२
र्वंशीध्वनिर्वो युष्माकं श्रेयांसि व्यपोहयतु विगतापोहनानि करोतु नित्यं ददातीत्यर्थः। कीदृशः। कुरंगीदृशां मनोमोहने मौलि
घूर्णने चलन्मंदारकुसुमानां विस्रंसने स्तंभने आकर्षणे वशीकरणे महामंत्रः। पुनः कीदृशः। दर्पयुक्तैर्दानवैर्दूयमानानां देवता
नामनिवार्यदुःखविपत्तीनां भ्रंशो भ्रंशनरूपो नाशक इत्यर्थः। यच्छ्रवणमात्रेण देवा दैत्यभयान्मुच्यत इत्यर्थः ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अतएवविलक्षोगाढमानावलोकाद्विस्मयान्वितोलक्ष्मीपतिःश्रीराधापतिर्यत्रसइतिसर्गः॥ ७ ॥ इतिबालबोधिन्यामष्ट
मःसर्गः॥ ❁ ॥ अथप्रणत्यापिमानानपगमाडुपेक्षयाहरावंतर्हितिसत्यंतरुत्कापिवहिर्मानावगुंठितामालक्ष्यसखी
प्राहेत्याह॥ अथकृष्णांतर्द्धानेतरंतांराधांरहःएकांतेसखीउवाच॥ कीदृशीं। मन्मथेननतत्क्षणोऽयंत्यान्त्याखिन्नांयतःक
लहांतरितांतदवस्थांप्राप्तां।अतोरतिरसभिन्नांप्रियनिरसनेनरतिरसाद्विमुक्तां।तेनैवविषादेसंयुक्तां।अतोनुवारंवारंचि

इतिश्रीगीतगोविंदेखंडितावर्णनेविलक्षलक्ष्मीपतिर्नामाष्टमःसर्गः॥ ८ ॥ ❁ ॥तामथमन्मथखि
न्नांरतिरस❁भिन्नांविषादसम्पन्नां॥ अनुचिंतितहरिचरितांकलहांतरितामुवाचरहःसखी॥ १॥रामक्री
रागेयतिताले॥ हरिरभिसरतिवहतिमृदुपवने। किमपरमधिकसुखंसखिभुवने॥ १॥ माधवेमाकुरुमानि
निमानमये ॥ ध्रु ॥ ॥

तितंहरिंचरितेचाटूक्तिपादपतनादियया।यासखीनेपुरःपादपतितंवक्ष्यमंरूपा॥
निरस्यपश्चात्तपतिक, लहांतरिताहिसेतिकलहांतरितालक्षणे ॥ १॥ किमुवाचेत्याह।अयेमानिनिअकारणावज्ञातकृष्णानु
नयेमाधवेरमणीभुसहजाईमानंकल्पितदोषारोपणंमाकुरु॥ध्रु॥ कथंवंचकेस्मिन्मानोनकर्तव्यः।मृदुपवनेवहतिसतिह
रिरभिसरति॥ हेसखिभुवनेऽतःपरमधिकंसुखंकिमस्ति। माधवाभिसरणादन्यत्सुखंनास्त्येवेत्यर्थः॥ १ ॥ ॥ ८१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदागमनं विना त्वमपि स्थातुं न शक्तास्या इत्युक्तिचातुर्येणाह॥ कुचकलसं किमर्थं विफलीकुरुषे॥ आभ्यां किमपराद्धं येन तत्
करस्पर्शमंतरेणानयोर्वैफल्यं क्रियत इत्यर्थः॥ यतस्तालफलादपि गुरुं कठिनं सरसं शृंगाररसोपयोगि लक्षणसहितं च॥ अत
एव तद्विफलीकरणं न युक्तमित्यर्थः॥२॥ त्वदुपदेशं विनेयं क्रियते। अचिरमधुनैव तव वेदमनुक्षणं मया कियद्वा न कथितं॥
इदं किं॥ हरिं मनोहरणशीलं अतिशयेन रुचिरं रुचिप्रदं चाकारेण मा त्यज॥३॥ एतच्छ्रुत्वापगतधैर्येणाश्रुमुखीं प्रत्याह।

तालफलादपि गुरुमतिसरसं। किमु विफलीकुरुषे कुचकलसं॥२॥ कति न कथितमिदमनुपदमचि
रं। मा परिहर हरिमतिशयरुचिरं॥३॥ किमिति विषीदसि रोदिषि विकला। विहसति युवतिसभा तव
सकला॥४॥ सजलनलिनीदलशीतलशयने। हरिमवलोकय सफलय नयने॥५॥

त्वमधुना तद्यादुःखाद्विस्मारं स्मारं किमिति तप्यसे॥ अनुकूले प्रातिकूल्यमारोप्य विकला सती रोदिषि॥ मा विषीद मा रोदीरि
त्यर्थः॥ कथमेवं विधेयं॥ सकला तव प्रतिपक्षियुवतिसभा त्वन्मौग्ध्यदर्शनेन विहसति॥४॥ यथैषा न विहसति तथोपदि
श॥ सांबुपद्मपत्रैर्विरचिताशय्या यया हे ताह्यशि॥ हरिमवलोकय। तत्रोपविश्य संतापहरमवलोकयेत्यर्थः॥ तेन किं स्यात्। नय
ने सफलय॥ त्रिभुवननयनमहोत्सवावलोकादन्यत् फलं तापशमकं च नास्तीत्यर्थः॥५॥

Dr. Urmila Sharma Collection, Varanasi

८२

वं५
एतच्छ्रुत्वा विरहिणी श्रीराधा आह ॥ मनसि गुरुखेदं निकटस्थोद्वेगदायि दैन्ये किमिति जनयसि । नैवं विधेयं । तर्हि किं विधेयं । मम वच
नं शृणु ॥ कीदृशं । अनीहितमचेष्टितं मनसि अभिलषितमिति यावत् । प्रकृते त्वनीहितं विरहदुःखमेव तस्य भेदो यस्मात् ॥ ६ ॥ वक्त
व्यमेवाह ॥ हरिः समीपं यातु । किमर्थं । वचनं चाटु करोतु ॥ हृदयमतिचिंतं किमिति करोषि । श्रीकृष्णमधुरवचनेन मोदय
त्वचित्तं मा खेदयेत्यर्थः ॥ ७ ॥ श्रीजयदेवभणितं रसिकजनं सुखयतु ॥ यतोऽहं रे श्रीहरिं श्रृत एवातिललितं ॥ ८ ॥ तत्पाद
प्रणतं कृष्णं विभाव्य ईर्षां त्वितामपि कोपाविष्टां राधां हितैषिणी सखी अधिक्षिपति ॥ यस्मात्तस्मिन् प्रिये निरुपधि प्रेमाणुवं

विर तिर
जनयसि मनसि किमिति गुरुखेदं ॥ शृणु मम वचनमनीहितभेदं ॥ ६ ॥ हरिरुपयातु वदतु बहुमधुरं । किमि
ति करोषि हृदयमति [विधुरं] ॥ ७ ॥ श्रीजयदेवभणितमतिललितं । सुखयतु रसिकजनं हरिचरितं ॥ ८ ॥ स्निग्धे
यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये । तद्यु
क्तं विपरीतकारिणि तव श्रीखंडचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ २ ॥

मवंधुरे स्निग्धे स्निग्धचाटुवाक्प्रयोक्तरि यत्परुषासि निष्ठुरभाषिण्यसि । यत्प्रणमति स्तब्धासि दंडवत्स्थितासि । यद्रागिण्यनु
रागयुक्ते द्वेषस्थासि द्वेषमालंब्य स्थितासि । यदुन्मुखे त्वन्मुखावलोकनोत्सुके विमुखतां यातासि पराङ्मुखतां यातासि । हे विपरी
तकारिणि प्रतिकूलाचरणप्रवणे ॥ तत्तस्मादेतत्तेयद्विपरीतं तद्युक्तमेव । एतत्किं । सुखदचंदनलेपो विषमिवोद्वेजकः । तापा
पहारश्चंद्रः सूर्यवत्तापकः । शीतरूपं हिमं अग्निवद्दाहकं । निरंतरांतःस्फुरद्रूपाया क्रीडातज्जनिताहर्षास्तीव्रवेदना दुःसहव्यथा ॥
विपरीते कृते विपरीतमेव फलमित्यर्थः ॥ २ ॥ ८२

CC0. In Public Domain, Digitizagtion by eGangotri

अथ श्रीकृष्णस्य श्रीराधिकां प्रति वक्ष्यमाणचाटूक्तिस्मरणेन श्रीराधामहिमस्फूर्त्यानंदाविष्टस्तत्सौभाग्यद्योतनाय श्रीकृष्णस्यैश्व
र्यं व्यनक्ति ॥ श्रीगोविंदस्य पदारविंदम् ... शुभानां रसास्वादप्रतिबंधकानां विनाशाय वंदामहे ॥ कीदृशं । वलेर्नियमनात्त्रि
विष्टानंदो ये ये तेषामिंद्रादिदेवानां वृंदैरधिकादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शिता इंदिंदिरा भ्रमरा यत्र पुनः कीदृशं
। स्वच्छंदं मकरंदसुंदरं च यथा स्यात्तथा गलंत्याकाशगंगया स्निग्धं ॥ यस्यैकांशस्यैवं महिमा तेन ॥ श्रीकृष्णेन यच्चरणशिरो
धारणं प्रार्थितं तत्सौभाग्यं केन वर्ण्यमित्यर्थः ॥ २ ॥ अतएव श्रीराधिकामानोपशमनचिंतयामंदःकुंठितक्रियो मुकुंदो यत्र
ने २

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितेंदिंदिरं ॥ स्वच्छंदं मकरंद
सुंदरगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे ॥ २ ॥ इति श्रीगीतगोविंदे कलहां
तरितावर्णने मंदमुकुंदो नाम नवमः सर्गः ॥ ९ ॥ ❁ ॥ अत्रांतरे च मसृणरोषवशामसीमनिश्वास
निःसहमुखीं सुमुखीमुपेत्य ॥ स ब्रीडमीक्षितसखीवदनां प्रदोषे सानंदगद्गदपदं हरिरित्युवाच ॥ १ ॥

स इति सर्गः ॥ इति बालबोधिन्यां नवमः सर्गः ॥ ❁ ॥ ततः प्रातरारभ्य दिवसवृत्ते वृत्ते समुपक्रांतनिशादिवृत्तमाह । सखीप्रार्थना
नंतरे प्रदोषसमये हरिः किंचित्कोपोपशमेन प्रसन्नवदनां श्रीराधां मंदं मंदं समीपमागत्य प्रियाप्रसन्नतादर्शनानंदेन गलद्गद्
पदेन सहितं यथा स्यात्तथा वक्ष्यमाणमुवाच ॥ कीदृशीं । अतिनिश्वासेन निःसहं विरहदुःखासहिष्णुतया कोमलवचनादिरहितं मु
खं यस्याः । यतः शिथिलमानेन सख्या यत्नात् । अतएव किमधुना विधेयमिति तद्वचनानादरात्सब्रीडं यथा स्यात्तथा वीक्षितं सखीव
दनं यया ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

४२

८४

किमुवाचेत्याह। हे प्रिये चारुशीले कृतपूर्वमत्प्रार्थना त्वं धेर्यं मयि अनुदात्तत्वद्दे मुग्धे मानं मृषाभवत्या प्रकर्षजकोपं मुंच। यतो निदा
नमकारणं। मत्कोपेन तव किंस्यात्॥ त्वत्कोपलमयमेव कामाग्निर्मम मानसं दहति॥ तर्ह्यहं किं करोमि। मुखकमल
मधुपानं देहि। अतर्द्धाहस्य पाने नैव असौ निरस्त्यर्थः॥ ध्रु॥ तत्र चारुशीलत्वमेव वर्णयति। दुराप मिदं दूरेस्तु नर्मालापादिय
दित्वं किंचिदपि वदसि। तदा नैरुचिकौमुदी ममातिघोरं भयतिमिरं हंति॥ दुरापं प्रार्थने हेतुः। विगतकोपायास्तव वदनचंद्रमा

देशवराडीरागेऽष्टतालीताले॥ वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दरतिमिरमतिघोरं॥ स्फुरद
धरसीधवे तव वदनचंद्रमा रोचयति लोचनचकोरं॥ १॥ प्रिये चारुशीले मुंच मयि मानमनिदानं। सपदि
मदनानलो दहति मम मानसं देहि मुखकमलमधुपानं॥ ध्रु॥ सत्यमेवासि यदि सुदति मयि कोपिनी देहि खर
नखरशरघातं। घटय भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं॥ २॥

मम लोचनचकोरं स्फुरदधरसीधवे स्फुरणसूचिताधरपानार्थं साभिलाषं करोति॥ नयनयोश्चकोरत्वेन तदेकजीवनत्वमु
क्तं॥ १॥ कोपस्ते मयि न संभवत्येव संभवति चेत्तर्ह्येवं कुरु॥ हे सुदति अस्मत्सवदने। त्वदेकजीवने मयि यदि सत्यमेव कोपिन्य
सि तदा खरान् खराग्र नखशरास्तैः प्रहारं कुरु॥ तेन चेन्न तुष्यसि तदा भुजाभ्यां बंधनं घटय॥ तेनाप्यसंतोषस्तदा रदैर्दशनैः खं
डनं जनय। किं बहुनोक्तेन येन वा सुखजातं भवति सुखमुत्पद्यते तदेव कुरु॥ अत्र गूढोऽभिप्रायः स्वीयेपराधे निर्दंड एव युक्तो ४२
नोपेक्ष्य इति भावः॥ २॥

CC0. In Public Domain, Digitizagtion by eGangotri

त्वद्यमम क्रोपस्यकः प्रसंगो दंडस्य वा याति व श्रियासैवदंडं कुर्यात्॥ त्वमेव प्राणस्य मम त्वमेव जीवनमसि। सौभाग्यकारणभू
षणमपि त्वमेवासि त्वद्व्यतिरिक्तामज्जीवनादिकं चेन्नास्ति तदन्यांगनानां का वार्तेत्यर्थः॥ अत्राप्यपरितोषे यतो भवः संसारः स
एव रत्नाकरस्तत्र त्वं विविधमनोरथसाधकं रत्नं सर्वप्रेयसीश्रेष्ठेत्यर्थः॥ निःस्वोपयाररत्नाकराच्चिंतामणिं लब्ध्वात्मानं पूर्ण
मनुते तथात्र तत्लाभादेव मम पूर्णतेति भावः। अत एव भवती निरंतरं मय्यनुकूला भवत्वित्यर्थः॥ त्वदेकशरणस्य मम त्वद्व

त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नं॥ भवतु भवतीह मयि सतत
मनुरोधिनी तत्र मम हृदयमतियत्नं॥२॥ नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकन
दरूपं॥ कुसुमशरबाणभावेन यदि रंजयसि कृष्णमिदमेतदनुरूपं॥४॥ ॥ ॥

शवार्त्तिहृदये अत्यतिशयेन यत्नवत्॥ ३॥ स्वगुणपरीक्षणोपकरणत्वेन चेन्मामंगीकरोषि तथापि चरितार्थः स्यां। हे त
न्वि तव लोचनं नीलनलिनाभमपि संप्रति रक्तोत्पलरूपं धारयति। तदेतेन त्वय्यनुरंजनी विद्यास्तीत्यवधारितं॥ एवाम्याम
स्यारुणरंजनविद्यामयीत्वे यदीदं कृष्णं कृष्णरूपं मां तेन लोचनेन कुसुमशरबाणभावेन सानुरागदृष्ट्या रंजयसि तदेतदेतस्य
योग्यं भवति शिक्षितविद्याप्रयोगेनैव ज्ञायत इत्यर्थः॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

प२ च्य२

एतच्छ्रवणेन किंचित्प्रसन्नां वीक्ष्य चातुर्येणाभीष्टं प्रार्थयते ॥ तव शृंगाररसपूर्णकुचकुंभयोरुपरि मणिमाला चंचला भवतु
॥ तेन किं स्यात् ॥ मय्यनुरक्तं तव हृदयदेशं रंजयतु तच्छोभया मां कृतार्थयतु ॥ न केवलमिदं कांचिघनजघनमंडले रसतु शब्दा
यतां। कीदृक् शब्दं कुर्वती ॥ मन्मथस्याज्ञां घोषयतु ॥ वचनभंग्याभीष्टप्रार्थनेयं ॥ ५ ॥ तथाप्यनुत्तरां सानुशयां पुनराह ॥
हे स्निग्धवचने भण आज्ञापय। किमाज्ञापयामि ॥ तव चरणद्वयं सरसेन लसता लक्तकेन रागो यत्र तादृशं करवाणि। तत्र हेतुः

करे

स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं। रसतु रसनापि तव घनजघनमंडले घोषयतु म
न्मथनिदेशं ॥ ५ ॥ स्थल कमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागं। भण मसृणवाणि करवाणि
चरणद्वयं सरसलसदलक्तकरागं ॥ ६ ॥ स्मरगरलखंडनं मम शिरसि मंडनं धेहि पदपल्लवमुदारं। ज्वलति म
यि दारुणो मदनकदनारुणो हरतु तदुपाहितविकारं ॥ ७ ॥

दु

त्वद्विरहातुरम द्वेगदायि स्थलकमलं गंजयतीति गंजनं तत्तिरस्कारकमित्यर्थः ॥ तथा मम हृदयमनुरंजयतीति तथा। यतो ज
नितो रतिरंगे परभागः परमशोभा येन ॥ ६ ॥ त्वदंगीकारेणैव मम तापोपशांतिरिति सर्वविजयित्वगुणस्फूर्त्या विश्वः सदैन्यं प्रा
र्थयते। मम शिरसि पदपल्लवमर्पय। कीदृशं। अतुग्रे स्मरगरलं खंडयतीति तत्। न केवलमिदं। मंडनं चूडारत्नभूतं। तथोदारं वांछि
तप्रदं। प्रार्थने हेतुः। व्यामोहकारिमदनक्लेशरूपक्रूरकर्मा रुणः सूर्योपि यि ज्वलति। अतस्तेनोपाहितविकारेण नानावस्थारूपं ह ४४
रतु। तद्धारणमात्रेण तापो यास्यतीत्यर्थः ॥ ७ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

ततंश्रीराधांतः प्रसादमालंब्यसखीश्रीकृष्णमनुच्चैः प्राह ॥ हेपद्मावतीरमण राधारमणमुररवैरिणस्तवाति ॥ त्वियाराधिकां
लक्षीकृत्यवचनसमूहः कुपितराधिकासुखजनकोजयति ॥ तस्मात्तमप्रणीयसर्वोत्कर्षेणवर्त्तते ॥ तत्रहेतुः । चटुलंचंचलम
नेकप्रकारमितियावत् । चटुलचाटुनापटुमानापनयनसमर्थं । चारुअनुरागरमणीयं । पुनः कीदृशं । अतिशातंपरमसुखप्रद
मित्यर्थः ॥ पुनः कीदृशं । श्रीराधिकाचरणौकाश्रयस्यजयदेवकवेस्त्वदेकपरयाभारत्याभणितं । दुर्जयमानंजयाज्जयाच्चासौ
देवीचयातयाभारत्याभणितंतंवचनजातंजयतीतिवा ॥ ८ ॥ चातुर्येणानुनीतामपिप्रतिवचनमप्रयच्छंतींश्रीराधांस्व

इतिचटुलचाटुपटुचारुमुरवैरिणोराधिकामधि ... वचनजातं । जयतिपद्मावतीरमणजयदेवकविभारती
भणितमतिसातं ॥ ८ ॥ परिहरकृतातंकेशंकांत्वयासततंघनस्तनजघनयाक्रांतेस्वांतेपरानवकाशिनि ॥
विशतिवितनोरन्योधन्योनकोपिममांतरंप्रणयिनिपरीरंभारंभेविधेहिविधेयतां ॥ २ ॥ ॥

कृतविनोदेनान्यासंगशंकांनिवारयन्नाह ॥ अन्यस्त्रीसंभोगवितर्कःशंकाकृतआतंकः मृषान्यसंगसंभावनसाध्वसोययाहेतादृ
शीशंकांपरिहर ॥ कथंत्वयानिरंतरव्याप्तेमनसिअंतरमभ्यंतरंवितनोरनंगादन्योधन्यस्तादृक्सौभाग्यवान्जनःको
पिनप्रविशति । मनोद्वारेणैवतदभ्यंतरंप्रविशतिमनस्त्वत्वयाव्याप्तंकेनपथाप्रवेष्टव्यमित्यर्थः । अतएवान्यावकाशशून्ये अ
न्यावकाशो ... चेन्मनसिनास्तितर्हिकथंत्वयिसाधारणदृष्टिःस्यादित्यर्थः । शंकात्यक्तातर्हिकिंकर्त्तव्यं । हेप्रणयिनिपरीरंभा
नवसरे रंभेइतिकर्त्तव्यतांकुरु ॥ २ ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

धे२

यद्यस्मद्वचनं न प्रत्येषि तर्हि त्वमेव दंडमाचरेत्याह ॥ हे मुग्धे स्वीयेन्यकृतदंडलाघवान्मिद्वृत्तीलोपाये मयि निर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपीडनानि विधेहि ॥ हे चंडि शरणागतरक्षणपरांमुखे एतानि विधाय त्वमेव मुदमंच सुखं प्राप्नुहीत्यर्थः ॥ किमेतावतासीत्यपेक्षिते ॥ पंचबाणस्य चांडालः दुष्टचेष्टत्वात् ॥ तस्य बाणप्रहारात्प्राणा मा प्रयांतु ॥ त्वदीये चांडालप्रहारे तीवलाघवमित्यर्थः ॥ ३ ॥ मम कोपो नास्त्येवेत्यत आह ॥ हे शशिमुखि तव कोपाभिधायि भंगुरभ्रूर्भाति । न चेत्कोपिन्यसि

मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपीडनानि ॥ चंडि त्वमेव मुदमंच न पंच
बाणचंडालकांडदलनादसवः प्रयांतु ॥ ३ ॥ शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहनकराल
कालसर्पी ॥ तदुदयभयभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः ॥ ४ ॥

तत्कुतो भ्रुवोर्भंगुरत्वमितिभावः ॥ सहजैव भ्रूर्भंगुरा न कोपात् युवजनस्य मम मोहनाय भयंकरी कालसर्पी भीसुत्पादनं कोपं विनानेत्यर्थः ॥ तर्हि तया दष्टस्य तवौषधाभावादनर्थापत्तिरेवस्यात् ॥ तस्मादुदितस्य भयस्य नाशाय यूनामस्माकं । वक्रवचनं प्रियाप्रसन्नता मा लब्ध्वा मनो वक्रमननात् त्वदधरसीधुसुधैव सिद्धमंत्रः । नान्यत्किंचिदस्तीत्येवार्थः ॥ मादकत्वान्माधुर्यात् मधुरत्वात्सुधेत्युक्तं ॥ कालसर्पीदष्टस्य मृतादेवजीवनेनान्यथेत्यनन्यगतिकत्वं च बोधितं । त्यसेवं धिक्कृतानि दृष्ट्वोपेक्षां विदधाना लोकमपि लोकाननुरुणत्सीतिभावः ॥
॥ ४ ॥ 

CC0. In Public Domain, Digitizagtion by eGangotri

एवमुक्तेप्युत्तरमाह ॥ हेतन्वि मदलाभात् क्षीणे वृथाकारणकृतमौनं मां व्यथयति तस्मात् पंचमं पंचमस्वरं विस्तारय मधुरं वदेत्य
र्थः । तेन किं स्यात् ॥ हे तरुणि विविधसाभिप्रायावलोकशालिनि । नर्मादिमधुरालापैस्तापं विकरुताद्विजकर्णज्वरमपसारय ।
किंच ॥ हे सुमुखि सहजसुंदरवदने कृपावलोकैरौदास्यं त्यज । सुमुख्याविमुखीभावो नयुक्त इत्यर्थः ॥ कथमेवं करोमि । हे मुग्धे
पूर्वोत्तरविचारानभिज्ञे । प्रियस्त्वत्प्रेमपात्रं अतिशयस्निग्धः अतिशयेन स्नेहवान् अयमहं स्वयमनाहूत एवागतः । अतो म

व्यथयति वृथा मौनं तन्चि प्रपंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ॥ सुमुखि विमुखीभावं तावद्वि
मुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोऽय मुपस्थितः ॥ ५ ॥ बंधूकद्युतिबांधवोयमधरः स्निग्धोम
धूकछविर्गंडश्चंडि चकास्ति नीलनलिनश्रीमोचनं लोचनं ॥ नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंति प्रिये प्राय
स्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ॥ ६ ॥

त्यागो मूढतैवेत्यर्थः ॥ ५ ॥ यतः पंचपुष्पाश्रितास्यं ते निश्चिनोमि । अनंगः पुष्पायुध
विलासेन मोडनोतीत्यतस्त्वं प्रसीदेति भंग्यातदंगानि स्तौति । हे चंडि प्रिये सप्रसिद्धः पुष्पायुधः प्रायः पंचपुष्पाश्रितत्वन्मुखसेवया विश्वं
विजयते इति तर्कयामि । कानि पुष्पाणि । तवायमधरो बंधूकपुष्पद्युतेर्बांधवः ॥ लौहित्यादत्र साम्यं । गंडे मधूकपुष्पच्छविः चकास्ति ।
पांडुत्वादत्र साम्यं नीलनलिनीश्रीमोचने कार्ष्ण्यादत्र साम्यं ॥ नासा तिलप्रसूनपदवीमभ्येति । अत्राकृत्या साम्यं । हे कुंदाभदंति । अत्र
शौक्ल्यात् साम्यं । त्वन्मुखसेवया तानि पंचपुष्पाणि लब्ध्वा तैरेवायुधैर्विश्वं विजयतीत्यर्थः ॥ ६ ॥

लोचने २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



एवमुपालंभे प्यनुत्तरां सन्निहितां प्रहोद्दुर्लभासीत्याह ॥ हेतन्विच्छीणा पित्वं पृथ्वीमागता पित्रातिदुर्लभं देवयुवतिसमूहं त्वहसीत्यहि आम्रेडितं ॥ तत्प्रकारमाह ॥ तव दृशौ मदेन प्रियेच्छणा हर्षेणालसे ॥ स्वर्गेत्विकैव मदालसा मदांगनात्वं मदालसे द्वे दृशौ त्वहसीत्य स्वार्थ्यमित्यर्थः ॥ एवमग्रे पियोज्यं ॥ तवेति सर्वत्रान्वेति । तथा वदनमिंदुसंदीपयतीति तत् ॥ तत्रैंदुसंदीपनीनाम्नी । गतिर्जनस्य मनमनोरमा । तत्र मनोरमानाम्नी । उरुद्वयं तिरस्कृता कदलीयेन ॥ तत्र रंभानाम्नी ॥ रतिः कौशलवती । तत्र कलावती । भ्रुवौ रुचिर चित्रले रेखेइव तत्रैका चित्रलेखा इति ॥ ७ ॥ एवं प्रियागुणकीर्तनावेशान्महासंकटस्थानानुभूतनतत्स्य शैसुखस्मरणाय

दृशौ तव मदालसे वदनमिंदुसंदीपनं गतिर्जनमनोरमा विधुतरंभमूरुद्वयं ॥ रतिस्तव कलावती रुचिरचित्रले
खे भ्रुवावहोविबुधयौवतं रहसितं त्विपृथ्वींगता ॥ ७ ॥ प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे राधा
पीनपयोधरस्मरणकृत्कुंभेनसंभेदवान् ॥ यत्रस्वि द्यतिमीलतिच्छणमप्यच्छिन्नच्छि पेतत्क्षणात् कंसस्यालमभू
छितं जितमितिव्यामोहकोलाहलः

रवशंग्नीकृत्सं वर्णयन्नाशास्ते ॥ हरिर्वो युष्माकं प्रीतिं तनुतां ॥ कीदृशः रणे कुवलयापीडेन
सह संभेदवान् ॥ संगतवान् । कीदृशेन । श्रीराधायाः पीनपयोधरयोः स्मरणकृतौ सादृश्येन संस्कारोद्बोधकतया स्मारकौ कुंभौ य
स्य । यत्र संभेदे तत्स्पर्शसुखेन सात्विकोदयात्कृष्णेच्छणं स्विद्यति मीलति च सति कंसस्यास्माभिर्जितं जितमिति व्यामोहकोलाहलो भूत
॥ तेनावहितेन कृष्णेन च्छिन्नच्छिपे सति तत्क्षणात् दंतेन जितं जितमिति व्यामोहकोलाहलो भूत् । पूर्वव्यामोहस्थाने दैन्यकातरत्वशोकौक्तेति
ज्ञेयं ॥ ८ ॥ ४६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतएव सर्गोयं श्रीराधास्मरणविकारवलनेन मुग्धो मनोहरो माधवो यत्र स इति सर्गः ॥ इति बालबोधिन्यां दशमः सर्गः ॥ ॥
एवं प्रियां प्रसाद्य मेघैर्मेदुर मित्युपःक्रांत वचनात् सखीसंमतिं चालक्ष्य कुंजशय्यायां श्रीकृष्णे गते सति सखी श्रीराधा महित्वा
॥ दृष्टिं पुष्णाति तमसा वृणोतीति दृष्टिमुट् तस्मिन् नवलोकतापहारिणि प्रदोषे स्फुरति सति केशवे च बाधाविरचितकुंजशय्यांत
दागमननिश्चयाद्गतवति सति कापि मेघैर्मेदुर मित्याद्युक्तवचना श्रीराधां जगाद ॥ किं कृत्वा । सुचिरकालं व्याप्यानुनयेन
शपथपाद पतनादिना मृगाक्षीं प्रीणयित्वा ॥ कीदृशी । रचिता ताम्रस्य भिसारवेषमुक्तार्थ्य प्रियरुचिकरीभूषा यस्या सा ॥ अव

इति श्रीगीतगोविंदे मानिनीवर्णने मुग्धमाधवो नाम दशमः सर्गः ॥ १० ॥ ॥ सुचिरमनुनयेन प्रीणयित्वा
मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां ॥ रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगा
द ॥ १ ॥ वसंतरागे यतिताले ॥ विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं । संप्रति मंजुलवंजुलसीमनि केलि
शयनमनुयातं ॥ १ ॥ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ ध्रुवं ॥

सादात्प्रियाप्राप्तिजदुःखान्निर्गतां ॥ कीदृशी ॥ कृतः प्रियामनोहरो वेशो येन ॥ १ ॥ मत्कागादतदाह । हे मुग्धे मधुमथनं वसंत
स्यापि क्षोभकं त्वदधीनमनुगच्छ ॥ अनुगतानुगमने शैथिल्यान्मुग्ध इति संबोधनं ॥ ध्रु ॥ अनुगतत्वं व्यनक्ति ॥ विरचिताना
नाभंग्या प्रतिपादितात्वत्क्रोपापसादिचाटुवचनानां रचना येन । चाटुवचनमात्रेण कथं ज्ञेयानुगतिः ॥ चरणे रचितो निजानन्य
गतिव्यंजकप्रणिपातो येन ॥ संप्रति तेन त्वत्प्रसादमालक्ष्य मनोहरवे[illegible] ॥ ह्री कुंजस्य सीमनि मध्यभागे यत् के
लिशयनं तत्र गतं । त्वदागमनप्रतीक्षया स्थिते ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



एतत्कुर्वणोऽपदोत्सुक्येन शीघ्रमिमं मालस्यमुत्साहयति घनजघनस्तनभारस्य भरोऽतिशयो यस्यास्तादृशीसहजालसगमनेदरमंथरचरणविह
रं मुखरं मणिमंजीरं चयस्यास्तादृशी प्रियसमीपं गच्छ ॥ तेन च हंसपराभवं कुरु ॥ नूपुरध्वने हंसरवपराभवित्वात् ॥ २ ॥ गत्वा
किं करोमि ॥ मधुरिपोरावंतत्कालोचितकमालापं शृणु ॥ कीदृशं ॥ अतिरमणीयं ॥ अत एव तरुणीजनानां मोहजनकं ॥ तेन च कोकि
लसमूहे द्वेषं त्यक्त्वा भावं प्रीतिं कुरु ॥ कीदृशे ॥ कुसुमसरासनस्य शासनवंदिनि ॥ हे युवत्यः कांतसन्नाहमेतरेण महाबाणादन्योरक्षिता
नास्य तो मानं त्यजत इति कामाज्ञातस्याः सकवके ॥ ३ ॥ किं वर्णया मितस्योत्कंठायद्दर्शनादचेतना अपित्वां त्वरयंतीति शुभनिमित्तानु

घनजघनस्तनभारभरेदरमंथरचरणविहारं । मुखरितमणिमंजीरमुपैहि विधेहि मरालनिकारं ॥ २ ॥ शृणु रम
णीयतरं तरुणीजनमोहनमधुरिपुरावं । कुसुमसरासनशासनवंदिनि पिकनिकरे भज भावं ॥ ३ ॥ अनिलतरल
किशलयनिकरेण करेण लतानिकुरंबं ॥ प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंबं ॥ ४ ॥ स्फुरितमनंगत
रंगवशादिव सूचितहरिपरिरंभं ॥ पृच्छ मनोहरहारविमलजलधारममुं कुचकुंभं ॥ ५ ॥

कूल्यमाह ॥ हे करभोरु लतासमूहोऽपि अनिलतरलकिशलयनिकरेण करेण तव प्रेरणं करोति । तस्मात् गमने प्रति विलंबं शैथिल्यं मुंच ॥
अचेतनानुकूल्येनापि त्वं चेतनेन द्रवतीत्यभिप्रायः ॥ वस्तुतस्तूद्दीपनमेवैतत्सर्वं ॥ ४ ॥ अस्तु वा मत्सर्वं त्वदंगान्येव त्वरां बोधयंतीत्याह ॥
यदिमद्वचनमनात्मीयमिति मन्यसे । तदात्मीयममुं वामं कुचकुंभं पृच्छ ॥ कीदृशं । अनंगतरंगवशादिव कंपितं ॥ अत एव मनोहरहारस्य
विमलजलधारा यत्र । कुचो यं कलसत्वेन रूपितः कंपितश्चानंगतरंगवशात्तस्माद्धारो पि जलधारात्वेन रूपितः । वामस्तनकंपनं नार्याः प्रि
यसंगमं सूचयतीति प्रसिद्धेरयमेव जिज्ञास्य इत्यर्थः ॥ ५ ॥ ४१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यसखीगोपनायव्याजमालक्ष्यकांच्यादिभूषणमेवतद्दाम्यन्नकीत्याह॥ तवेदंवपुरपिरतिरणसज्जमितितवेंगितज्ञाभिरखिलसखी
भिरपिज्ञातं।कथमन्यथाकांच्यादिग्रहणमितिभावः॥ नकेवलंमनएववपुरपीत्यपेरर्थः॥ ततोहेचंडिरणप्रवीणेअलज्जंलज्जा
रहितंसोत्साहंरसिततरसनारवमेवडिंडिमोवाद्यभांडविशेषोयत्रतद्यथास्यात्तथाभिसरप्रियाभिमुखमनंगरंगंयाहि।रणस
ज्जितस्यविलंबोभयाशंकामासंजयतीत्यर्थः॥६॥ तत्रगमनप्रकारमाह।करेणसखीमवलंब्यसलीलंयथास्यात्तथाचल॥की
शेन॥स्मरशरसुभगनखेन।संग्रामार्थंपंचनखाएवमोहनादिकामास्त्राणितानिगृहीत्वागच्छेत्यर्थः॥ तत्रविधेयमाह॥चलव

अधिगतमखिलसखीभिरिदंतववपुरपिरतिरणसज्जं॥ चंडिरसितरसनारवडिंडिममभिसरसरसमलज्जं॥
॥६॥ स्मरशरसुभगनखेनसखीमवलंब्यकरेणसलीलं। चलवलयक्वणितैरवबोधयहरिमपिनिजगतिशी
लं॥७॥ श्रीजयदेवभणितमधरीकृतहारमुदासितवामं। हरिविनिहितमनसामधितिष्ठतुकंठतटीमविरामं॥८॥

लयक्वणितैर्हरिमविबोधयचरणायकराद्यादिभिः सावधानंकुरु॥ तत्रहेतुः। निजगतौत्वत्प्राप्तौशीलंसमाधिर्यस्य॥शीलसमाधौ।
समीचीनोयोद्धाहस्त्वेनयुयुत्सुंप्रतिभटमवहितंकृत्वैवप्रध्यातइत्यर्थः॥७॥ श्रीजयदेवभणितंहरिविनिहितमनसांजनानांकंठत
टीमविरामंयथास्यात्तथातिष्ठतु॥ हारादेःसद्भावेकथमस्याविरामतास्यात्। अधःकृतोहारोयेन।इदमेवकंठभूषणमित्यर्थः॥
भूषणेवैतृष्णेविरामाशंक्याविछित्तिःस्यात्॥दूरीकृताराभाप्रकृष्टारमणीयेन॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



पुनस्त्वरयितुं श्रीकृष्णस्योत्कंठामाह । सा प्रियासखीवचनातुरो धैर्येन सविलासमंदगमनेनाद्वासमागत्य मां तत्र स्वबुद्धं सादरमवलो
कयंतं प्रसन्नदृष्ट्या द्रक्ष्यति किं वा मदपराधस्मृत्या विनतवदना भविष्यति । समागत्येति प्रत्येकं संबध्यते ॥ दृष्ट्वा च तत्कालोचितस्म
रकथां वक्ष्यति । किं वा तूष्णीं स्थास्यति ॥ प्रेमालापं कृत्वा च प्रत्यंगमालिंगनैः प्रीतिं प्राप्स्यति ॥ किं वालिंगनोत्कमत्करं धृत्वा तिष्ठे
त् । प्रीतियुक्ता सती मया सह रंस्यते । किं वा कैतवेनोदास्यतीति स प्रियः श्रीकृष्णः संचिंतयन् स्थिरतमःपुंजे निकुंजे पुरः स्फुरंतीं त्वां

सा मोदयिष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति संचिंतयन् ॥ स त्वां पश्य
ति वेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमःपुंजे निकुंजे प्रियः ॥ २ ॥ अक्ष्णोर्निक्षिपदं
जनं श्रवणयोस्तापिंछगुच्छावलीं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं ॥ धूर्तानामभिसारसत्व
रहृदां विष्वङ्निकुंजे सखि ध्वांतं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति ॥ ३ ॥

पश्यति ॥ दृष्ट्वा च मुदा वेपते पुलकयति आनंदयति स्विद्यति च ॥ पुनः स्फूर्त्यवगमे । सैषा प्रियागतेति चरणाग्ररुद्धवसुंधरो दग्रग्रीवः सुदूरं त्वाम
वलोकितुं प्रत्युद्गच्छति । ततः प्राप्नेत्यानंदेन मूर्छति ॥२॥ अंधकारोपि त्वेकमनव्याजमसहमानस्त्वामलंकरोतीत्याह ॥ हे सखि सर्वतो व्याप्तं
ध्वांतं सुदृशां प्रत्यंगमालिंगति । प्रियाभिसारेनुकूल्येन सुखं ददातीत्यर्थः । तदेवाह ॥ नीलनिचोलचारु । सर्वांगावरकत्वेन । आलिंगनमुत्
प्रेक्षितं । कीदृशीनां । धूर्तानां परवंचकानामतएवाभिसारे सत्वरं हृद्यासां । परवंचकतया कांचित्कदाचित्सत्वरमभिसारे द्विति विलंबोन का
र्यं इत्यर्थः । किं कुर्वत् ॥ अक्ष्णोरंजनं श्रवणयोस्तमालस्तवकश्रेणीं मूर्ध्नि श्यामसरोजानां दाम कुचयोः कस्तूरिकापत्रभंगलेखां च निक्षिपदर्प ४८
यत् ॥ २ ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न केवलं भूषणं प्रेमपरीक्षणकारणमप्येतदित्याह ॥ एतत्तु मिश्रं अभिसारिकाणामभितो रुचिमंजरीभिराबद्धवे 'एं' यत्तत्प्रेमहेम्नो निकषपाषाणतां तनोति । कीदृशीनां काश्मीरवद्गौरं वपुर्यासां । यथा निकषपाषाणे सुवर्णस्य शुद्धजिज्ञासा तथासां प्रेम्णोपि निःसाध्वसगमने जिज्ञासेत्यर्थः ॥ कीदृशं तमालदलवन्नीलतमं ॥ एतेनांधकारस्य वृक्षं तमालवनविहरणं च साधितं ॥४॥ ततस्तन्निकटं गत्वापि पूर्वं मया बहुधा तिरस्कृतस्य समीपं कथं यामीति लज्जया केलिगृहमविशंतीं प्रति सखी प्राहेत्याह ॥ निकुंजस्य द्वारे हरिं विलोक्य व्रीडावतीं सखीं श्रीराधां । अथ मे घे मेंडुर विरचितचाटु इत्यादिवचनानंतरमियं सखी इति वक्ष्यमाणमुवाच ॥ कीदृशस्य ॥ हारावलेर्मध्यगा

काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमंजरीभिः ॥ एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥४॥ हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य । द्वारे निकुंजनिलयस्य हरिं विलोक्य व्रीडावतीमथ सखीमियमित्युवाच ॥५॥ बराडीरागे रूपकताले ॥ मंजुतरकुंजतलकेलिसदने प्रविश राधे माधवसमीपमिह विलस रतिरभसहसितवदने ॥ध्रु०॥ नवभवदशोकदलशयनसारे प्रविश राधे माधवसमीपमिह विलसकुचकलसतरलहारे ॥१॥

नां मणीनां कांचनकांचिदाम्नो मंजीरयोः कंकणयोश्च मणीनां द्युतिभिर्दीपितस्य । किमु वाचेत्याह । हे राधे माधवसमीपं प्रविश ॥ प्रविश्य च इह मंजुतरकुंजतले कुंजाभ्यंतरदेशस्तद्देव केलिसदनं तत्र विलस तत्र हेतुः ॥ रतिरभसेन हसितं वदनं यस्याः हे तादृशि ॥ तवोल्लसितं मनो लुत्सुकतया हास्यमिषेण प्रियमिलनाय बहिर्निर्गतमिति भावः ॥१॥ मन्मनोनो छलितेकिंचेतस्य नवनागरस्य वैकल्यावलोकाद्धसितमिदं । तत्राह । सर्वत्र पूर्ववत्सुखवेधयोजना । प्रतिपदशेषार्द्धं ध्रुवं ॥ केलिसदने कीदृशे ॥ नवभवदशोकदलैः तत्पत्रै रचितं शयनं श्रेष्ठं यत्र । कुचकलसयोः कंपेन तरलो हारो यस्य हे तादृशि । कुचकम्पनेनांतर्वृत्तिर्व्यक्ता तेन वाम्यं युक्तमित्यर्थः ॥ ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अस्याभिप्रायविशेषावकलनात्कंपोयमित्याह। पुनःकीदृशे। कुसुमचयेनरचितंशुचेःशृंगारस्यवासगेहंयत्र। निकुंजाभ्यंतरेपुष्पगृह
रचनाविशेषात्पौनरुक्त्यं। कुसुममेभ्योपिसुकुमारोदेहोयस्याहेतादृशि॥ निकुंजद्वारगतःप्रियस्त्वांप्रतीक्षते॥कुंजरचनेदृशीतवकु
सुमसुकुमारतनुरतोवामंनयुक्तमितिभावः॥३॥ अथोद्दीपनयातिशयेनकेलिसदनमेववर्णयति॥चलेनमलयवनपवनेनसुरभिशी
तंचयत्॥ रतौवलितेरतियोग्यंगीतेललितंयस्याहेतादृशि॥ अतोस्मिन्प्रविश्यतदाचरेत्यर्थः॥४॥ विततानांवहुवल्लीनांनवप पुनःकीदृशे।

कुसुमचय रचितशुचिवासगेहेप्रविशराधेमाधवसमीपमिहविलसकुसुमसुकुमारदेहे॥३॥चलमलयव
नपवनसुरभिशीतेप्रविशराधेमाधवसमीपमिहविलसरति वलितललितगीते॥४॥विततवहुवल्लिनवप लवे
ल्लवघनेप्रविशराधेमाधवसमीपमिहविलसचिरमलसपीनजघने॥५॥मधुमुदितमधुप कुंकलितरावे
प्रविशराधेमाधवसमीपमिहविलसमदनसरसभावे॥६॥मधुरतरपिकनिकरनिनदमुखरेप्रविशरा
धेमाधवसमीपमिहहरिलसदशनरुचिरशिखरे

ल्लवैर्घनेनिविडे॥अलसंचपीनंचजघनंयस्याहेतादृशि। चिरमिहविलसक्रिया
विशेषणं॥ईदृशंजघनंचसफलंकुर्वित्यर्थः॥५॥पुनःकीदृशे॥ मधुनामुदितेनमधुपकुलेनविहितशब्दोयत्र।मदनरसेनसरसभा
वःस्वारस्यंयस्याहेतादृशि॥ ईदृग्भावायास्तवतन्निकटप्रवेशएवयोग्यइत्यर्थः॥६॥ पुनःकीदृशे॥मधुरतरैःपिकनिकरनिनादैर्मु
खरे॥ दशनाएवरुच्याचारुचिरमालिक्यविशेषायस्याहेतादृशि। ईदृग्दशना विशेषकृत्यमेवयुक्तमित्यर्थः॥७॥ ॥। ४९
यासनक्रिया१ शृंगाररसेन३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



हे मुरारे जयदेवकविराजराजे भणति सति। त्वदर्थं सखीप्रार्थनमिति शेषः। मंगलशतानि कुरु। तत्र हेतुः। विहितः स्तद्दर्शनेन पद्मा
वत्याः श्रीराधायाः सुखसमूहो येन। एतद्दर्शनविशेनात्मानं वञ्चमन्यमानस्य कविराजस्य इति प्रौढोक्तिरियं॥ ८॥ अथ सखीप्रसादमाल
स्य कौतुकेन सनर्माह॥ अयं चित्तेन त्वां वहन्नतिश्रांतः। पीनस्तनश्रोणिगुरुतये त्यर्थः। कंदर्पेण च भृशं तापितः। अतः श्रमेण ता
पेन च पिपासितः सुधयासंवाधं संकटं व्याप्तमिति यावत्॥ विंवाधरं पातुमिच्छति। तस्मादस्यांकं क्षणं शोभय॥ अंतःस्थिताया

विहितपद्मावतीसुखसमाजे कुरु मुरारे मंगलशतानि भणति जयदेवकविराजराजे॥ ८॥ त्वां चित्तेन वहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण च पातुमिच्छति सुधासंवाधविंवाधरं॥ अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्रमः॥ ५॥ सा ससाध्वससानंदं गोविंदे लोललोचना॥ सिंजानमंजुमंजीरं प्रविवेश निवेशनं॥ ६॥

वहिःस्थितस्यान्यथापायत्वानुपपत्तेरिति भावः॥ अविदितामिप्रायस्यां कप्रवेशे मन्मनः
संकुचति। इत्युक्ते कुतः संकोचः। कीदृशे। भ्रुवोः क्षेपश्चालनं तस्य वलक्ष्मीर्मद्धिस्तस्या लेसेन क्रीते। कस्मिन्निव। अल्पमूल्यकृतदास इव
॥ क्रयक्रीते संकोचो नयुक्त इत्यर्थः॥ क्रीतत्वे हेतुः॥ सेवितपदांभोजे येन। क्रीतस्यैव सेवोपयोगात्॥ ५॥ इति सखीवचनोच्छलितचित्तांकुं
जे विवेशेत्याह। सा सिंजानमंजुमंजीरं ससाध्वसं सानंदं च यथा स्यात्तथा कुंजगृहं प्रविवेश॥ प्रथमसमागमात्साध्वसं विच्छेदानंतरप्राप्त्या
सानंदमिति ज्ञेयं॥ अतएव गोविंदे लोले सतृष्णे लोचने यस्याः॥ ६॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



एवंकुंजप्रवेशमुक्त्वा श्रीकृष्णस्य तद्दर्शनानंदविकारान्वर्णयंस्तस्यास्तद्दर्शमाह। साश्रीराधाहरिंददर्श। कीदृशं। एकस्मिन्नालंबने श्री
राधारूपे रसो यस्य। तस्याः सर्वोत्तमतानिश्चयेन तदेकपरमित्यर्थः॥ नन्वन्यांगनाभीरममाणस्य कुतस्तत्परत्वं॥ चिरं पूर्वोक्तप्रकारे
णाभिलषितस्तया सह विलासो येन॥ अत एव तत्प्रसादावकलनात् गुरुहर्षस्याचन्तं वदनं यस्य। तेनैवानंगस्य विकाशो यत्र॥ कृ॥
तदेकनिष्ठत्वमेव दृष्टांतेन स्पष्टयति॥ पुनः कीदृशं। राधावदनविलोकनेनैव रससमुद्रस्यैं कसिताः प्रकटिता विविधा हर्षगर्वापांगेच्छा

वराडीरागे रूपकताले॥ राधावदनविलोकनविकसितविविधविकारविभंगं॥ जलनिधिमिव विधुमंडलदर्शनतर
लिततुंगतरंगं॥ १॥ हरिमेकरसंचिरमभिलषितविलासं। सा ददर्श गुरुहर्षवसेवदवदनमनंगविकाशं॥ ध्रु॥
हारममलतरतारमुरसि दधतं परिलंब्य विदूरं। स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं॥ २॥ श्याम
लमृदुकलेवरमंडलमधिगतगौरदुकूलं॥ नीलनलिनमिव पीतपरागपटलभरवलयितमूलं॥ ३ गी।

दिरूपास्तरंगा यत्र॥ कमिव जलधिमिव। कीदृशं। जलधिं। विधुमंडलदर्शनेन चंचलीकृतास्तुंगास्तरंगा यत्र॥ १॥ विकारा
नेवाह॥ पुनः कीदृशं। विदूरं परिलंब्य हारं दधानं। कीदृशं हारं॥ निर्मलतारं स्वच्छमौक्तिकानि यत्रेत्यर्थः॥ कमिव। यमुनाजलपूरमिव॥
कीदृशं पूरं॥ स्फुटतरफेनकदंबेन करंबितं खचितं॥ २॥ पुनः कीदृशं॥ श्यामलं च मृदुलं च कलेवरमंडलं यस्य॥ यथोचितावयवसन्नि
वेशप्रतिपादनार्थं मंडलत्वेनोक्तिः॥ तथा प्राप्तं पीतदुकूलं यत्र। कमिव। नीलनलिनमिव॥ कीदृशं। पीतपरागाणांसमूहातिशयेन वेष्टि
तं मूलं यस्य॥ परागावृतमूलत्वेनाभूतोपमेयं॥ ३ गी।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



पुनः कीदृशं। चंचलस्य दृगंचलस्य वलनेन मनोहरं यद्वदनं तेन जनितस्तस्या रतिरागो येन। कमिव। शरदितडागमिव। कीदृशं विकसितपद्मोदरे क्रीडापरं खंजनयुग्मं यत्र। कंजे खंजनदर्शनेन त्वामिलाष सिद्धिसंभाव्योल्लसितमिति ध्वनितं॥ ४॥ पुनः कीदृशं। वदनकमलस्य प्रकाशनाय मिलिताभ्यां सूर्यसदृशाभ्यां शोभा यत्र। स्मितरुचिरेव कुसुमं तेन समुल्लसितो राधाधरपानोत्कंठयोत्कंपितो योऽधरपल्लवस्तेन जनितस्तस्या रतिलोभो येन॥ ५॥ पुनः कीदृशं। शशिकिरणोर्व्याप्तं उ॑रं यस्य जलधरस्य तस्येव सुंदराः सुकुसु

तरलदृगंचलचलनमनोहरवदनजनितरतिरागं। स्फुरदमलोदरखेलितखंजनयुगमिव शरदितडागं॥ ४॥ वदनकमलपरिशीलनमिलितमिहिरसमकुंडलशोभं॥ स्मितरुचिकुसुमसमुल्लसिताधरपल्लवकृतरतिलोभं॥ ५॥ शशिकिरणच्छुरितोदरजलधरसुंदरसकुसुमकेशं॥ तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥ ६॥ विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं॥ ७॥ श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं। प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं॥ ८॥ ४

माः केशा यस्य। तथा तिमिर उदितं यद्विधुमंडलं तद्वन्निर्मलश्चंदनतिलक निवेशो यस्य। तिमिरेपूर्णेंदुदर्शनं यासंभवादभूतोपमेयं॥ ६॥ पुनः कीदृशं॥ विपुलानां पुलकानामतिशयेन दंतुरीकृतं व्याप्तमित्यर्थः॥ अत एव तस्या दर्शनाज्जनितरतिकेलिकलाभिरधीरं चंचलं। तथा मणिगणकिरणानां समूहेन समुज्ज्वलैर्भूषणैः सुंदरं शरीरं यस्य॥ ७॥ भोः सखायो हृदि हरिं विनिधाय सुचिरं प्रणमत॥ कीदृशं। पुण्यविशेषस्य य उदयः फलं तस्य सारभूतं। तथा जयदेवभणितस्य यो विभवस्तेन द्विगुणीकृतो भूषणभारो यत्र। स्वयं येरलंकृतस्तैलेकाराजयदेवस्योपमादिव वाग्विलासे द्विगुणीकृत इत्यर्थः॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

एवंकृष्णस्य श्रीराधादर्शनानंदविकारमुक्त्वा श्रीराधायास्तद्दर्शनानंदविकारमाह ॥ तदानीं श्रीकृष्णावलोकसमये श्रीराधायाम्
क्ष्णोर्हर्षाश्रुनिकरः पपात ॥ तत्रोत्प्रेक्ष्यते । स्वेदांभः प्रसर इव ॥ तत्र हेतुः ॥ अतिचंचला तारा नेत्रकनीनिका यत्र ॥ तद्यथास्यात्तथाप
तितयोः । यः कश्चित्पतति सोपि स्विन्नस्तरलतारं कृत्वा लज्जया दिशोवलोकत इत्यभिप्रायः ॥ अत्राप्युत्प्रेक्षा ॥ नेत्रांतमतिक्रम्य श्र

अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः । तदानीं राधायाः प्रियतमस
मालोकसमये पपात स्वेदांभः प्रसर इव हर्षाश्रुनिकरः ॥ ७ ॥ भजंत्यास्तल्पांतं कृतकपटकंडूतिपिहितस्मितं
याते गेहाद्बहिरवहितालीपरिजने ॥ प्रियास्यं पश्यंत्याः स्मरशरसमाकूतसुभगं सलज्जा लज्जापि व्यगमद
तिदूरं मृगदृशः ॥ ८ ॥

वणपथपर्यंतगमनप्रयासेन इव ॥ यो यत्पतितं गच्छति सोपि पतत्येवेत्यर्थः ॥ ७ ॥ ततः शय्यांतिकं गतायास्तस्याः प्रियदर्शनावेशेन लज्जावि
जितेत्याह ॥ तत्सुखानुकूल्ये सावधानो यश्चालीपरिजनस्तस्मिन्कृतया कपटकर्णादिकंडूत्या छादितस्मितं यथास्यात्तथा गेहाद्बहि
र्याते सति मृगदृशः श्रीराधिकाया लज्जापि सलज्जा सती अतिदूरं विशेषेणागमत् ॥ कीदृश्याः । शय्यानिकटं गतायाः । ततश्च स्मरशरेण
समाकूतं यद्धास्यकटाक्षादिकं तेन सुंदरं यथास्यात्तथा प्रियास्यं पश्यंत्याः ॥ प्रियास्ये विशेषणं वा ॥ ८ ॥ ५१

तयाभिलाषविशेषेणालोच्यमानेश्रीकृष्णस्य भुजदंडं स्मरन् तत्कौर्यं वर्णयति ॥ मुरजितो भुजदंडो जयति । कीदृशः ॥ भुजापीडस्य क्रीडयाहतकुवलयापीडकरिणः प्रकीर्णा विच्छिन्ना लग्ना इतियावत् असृग्बिंदवो यत्र । तत्रोत्प्रेक्षते । जयश्रियाक्षिप्तैर्मंदारकुसुमैरर्चित इव ॥ जयश्रीपूजितत्वेनहेतुनोत्प्रेक्षांतरमाह ॥ द्विपेन सह संग्रामहर्षेण स्वयं सिंदुरेण तज्जयख्यापनाय मुद्रित इव ॥ ८ ॥ अतएव

जयश्रीक्षिप्तैर्महित इव मंदारकुसुमैः स्वयंसिंदूरेणद्विपरणमुदामुद्रितइव ॥ भुजापीडक्रीडाहतकुवलयापीडकरिणः प्रकीर्णासृग्बिंदुर्जयति भुजदंडो मुरजितः ॥ ८ ॥ इतिश्रीगीतगोविंदे सानंदगोविंदोनामैकादशः सर्गः ॥ ११ ॥ ❀ ॥ गतवति सखीवृंदेमंदत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां ॥ सरसमनसं दृष्ट्वा मुग्धां नवपल्लवप्रसरशयने निक्षिप्ताक्षीमुवाच हरिः प्रियां ॥ १ ॥ ॥ ॥

वविप्रलंभानंतरप्राप्तानंदेन सहितो गोविंदो यत्र स इति सर्गः ॥ ❀ ॥ इति बालबोधिन्यामेकादशः सर्गः ॥ अथ तां प्रेमोल्लासाविष्टामालक्ष्यात्मानं कृतार्थं मन्यमानः श्रीकृष्णो नितिचाटुवचसा प्रियामाहेत्याह ॥ सखीवृंदे गतवति सति हरिः प्रियामुवाच ॥ किं कृत्वा सरसमनसं दृष्ट्वा हृष्ट्वा । तत्र हेतुः ॥ मंदोयस्त्रपाभरस्तेन निर्भरोयः स्मरस्तद्वशो यश्चाकूतोभिप्रायस्तेन स्फीतं यत् स्मितं तेन स्नपितो धरो यस्याः ॥ अतएव नवपल्लवरचितविस्तीर्णशय्यायां वारं वारमर्पिता दृष्टिर्यया ॥ मुग्धस्तद्दर्शनेनेच्छाविशेषावकलनादित्यर्थः ॥ १ ॥ ॥

हृष्ट्वा १

CC0. In Public Domain, Digitizagtion by eGangotri



ना ५

तामुवाचेत्याह॥ हे राधे नारायणं नराणां दक्षिणाद्दिनायकानामयनमाश्रयो यस्तं महानायकं मामत एव नारीणां समूहो नारं तस्याश्रयो यस्तं नारीसमूहाश्रयमपित्वा मनुगतं त्वदेकपरमधुना क्षणमप्यनुभज॥ वकुचवल्ल भोपित्वतस्मागमायनारीणां त्वत्सखीनां समूहमाश्रये इत्येतदर्थत्रयं तंत्रेणोपात्तं भवतेति॥ ध्रु॥ कथमनुभजामीत्याह॥ हे विविधाभिलासशालिनि किशलयशयनस्योपरि चरणकमलयोर्विन्यासं कुरु॥ तेन किंस्यात्॥ इदं किशलयशयनं पराजयमनुभवतु। कुतोस्य पराजयः साध्यः॥ नवपदपल्लववैरि। अरुणतादिभिर्गुणैः साम्याकांक्षयावैरित्वं॥ कीदृशे शयने॥ सुवेशं। तैर्गुणैः शोभने॥ १॥ अनुगतत्वं व्यनक्ति॥ अहं त्वत्स्पर्श

।विभासरागे यतिताले॥ किशलयशयनतले कुरु कामिनि चरणकमलविनिवेशं॥ नवपदपल्लववैरिपराभवमिदमनुभवतु सुवेशं॥ १॥ क्षणमधुना नारायणमनुगतमनुभज राधिके॥ ध्रु॥ करकमलेन करोमि चरणमहमागमितासि विदूरं॥ क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं॥ २॥ वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूले। विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं॥ ३॥ ॥ ॥ ॥ ॥

नुकूलेन निजकरकमलेन तव चरणयोर्महं संवाहनादिरूपां पूजां करोमि। यतस्त्वं विदूरमागमिता सि आनीतासि। दूरागतपूजायुक्तैवेत्यर्थः॥ तदर्थं क्षणं शयनोपरि नूपुरमिव मामंगीकुरु। उभयं विशिनष्टि॥ अनुगतो नितरां। अनुगतस्य पादलग्नस्योपकारावरणं युक्तमेवेत्यर्थः॥ २॥ अथ तद्वचनशुश्रूषया प्रार्थयते। अमृतमिव। वचनं वद। मधुरं वदेत्यर्थः॥ कुतोमृतत्वं। यतो वदनेंदोर्गलितं। अतोनुकूलं मत्साध्यसं पसारि। किमेतावता तवेप्सितं सेत्स्यति दुकूलमपसारयामि॥ कुतः पयोधररोधकं॥ कमिव विरहमिव। यथा विरहेण पयोधरदर्शनं विछिद्यते गीतगोविंदटी० ५२

Dr. Urmila Sharma Collection, Varanasi

ततोवक्त्रमवलोकयंतीत्याह॥ मदुरसि कुचकलसं स्थापय॥ उरस्येवार्पणे हेतुः। अतिदुर्लभं दुर्लभस्योरस्येव धारणं युक्तमित्यर्थः तर्हि कि
थे प्रार्थ्यते॥ प्रियस्य मम परिरंभणाय यो रभस उत्साहस्तेनोच्छलितमिवोत्प्रेक्षे॥ उत्प्रेक्षापि कुतः। पुलकितं यथा तिर्य्यवलोकात्कर
णस्तदार्त्तिशमनाय पुलकितो भवति तद्वदयमपीत्यर्थः॥ किमर्थं तं विनिवेशयामि॥ कामतापं खंडय। रसायनकलसार्पणात्तापो
पशांतिः स्यादित्यर्थः॥ ४॥ अन्यथा मे दशमी दशामेवस्यात्॥ हे भामिनि॥ चक्रदृष्ट्यावलोकनाद्भामिनीत्युक्तं॥ अधरसुधारसं

प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापं। मदुरसि कुचकलसं विनिवेशय शोषय मनसिजतापं॥
॥४॥ अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं॥ त्वयि विनिहितमनसं विरहानलदग्धवपुषमवि
लासं॥५॥ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं॥ श्रुतिपुटयुगले पिकरुतविकले मम शमय
चिरादवसादं॥६॥

देहि॥ किमर्थं। मृतमिव दासं जीवय। अमृतं दत्वा मृतमिव संजीवयेत्यर्थः॥ तत्रात्मनोऽनन्यगतिकत्वमाह॥ त्वय्येवार्पितं मनो येन। तव
कापि पीडा न लभ्यते तत् कथमेवं कथयसि॥ विरहानलेन दग्धं वपुर्यस्य। तदपि कुतः॥ अविलासं विलासाभावादित्यर्थः॥ ५॥
मौनेन तत्संमतिमालक्ष्य लोभादन्यदपि प्रार्थयते॥ हे शशिमुखि मणिरसनागुणं मुखरीकुरु॥ कीदृशं अनुगुणः सदृशः कंठनिनादो
मणितादिकं यस्य॥ प्रार्थनाविशेषोऽयं। तेन किं स्यात्॥ मम श्रुतिपुटयुगले चिरकालीनमवसादं शमय॥ तदवशाद्दुःखं कुतः। पिकरुतैर्वि
कलेव धरीकृते॥ ६॥

CC0. In Public Domain, Digitizagtion by eGangotri



मथ्यकारणकोपेनतवनयनमेवभ्रमाणमितिनिगद्यप्रार्थ्यते॥इदंतवनयनमधुनामामवलोकितुंलज्जितमिवमीलति।किमितिलज्जितं
अत्यकारणकोपाह्विकलीकृतं।यःकश्चिन्निरपराधंकुपित्वाव्याकुलीकरोतिसोपितन्मुखावलोकनेलज्जितोभवतीत्यर्थः॥तर्ह्यधुना
किंकर्तव्यंविरमशरोषादितिज्ञेयं।ततोरतौखेदंवामंत्यज॥७॥इदंतन्नतप्रार्थनारूपंश्रीजयदेवभणितंकर्तृरसिकजनेषुश्रीकृ
ष्णभक्तिरसविशेषज्ञेषुश्रीकृष्णस्यरतिरसेयोभावस्तदास्वादरूपस्तेनयोविनोदःसुखंतंजनयतु॥यतःप्रतिपदंनिगदितोमधु
रिपोर्मोदोयत्र॥८॥एवंकेल्युपकरणसामग्रीनिरूप्योपक्रमोक्तरहःकेल्यारंभमाह॥यस्मिन्सुरतारंभेप्रत्यूहोविघ्नोपिञ्ञ

लु।
मामतिविफरुषाविकलीकृतमवलोकितुमधुनेदं।मीलतिलज्जितमिवनयनंतवविरमविसृजरतिखेदं॥७॥
श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं।जनयतुरसिकजनेषुमनोरमरतिरसभावविनोदं॥
॥८॥प्रत्यूहःपुलकांकुरेणनिविडाश्लेषेनिमेषेणचक्रीडाकूतविलोकनेधरसुधापानेकथानर्मभिः॥आनं
दाधिगमेनमन्मथकलायुद्धेपितास्मिन्नभूदुद्भुतःसतयोर्बभूवसुरतारंभःप्रियंभावुकः॥२॥

हमहामिकापरीतचेतसोस्तयोःप्रियंभावुकःप्रीतिजनकोभूत्सवहुविधसंभ्रमावस्थापादकः।सुरतारंभउद्भूतोबभूव॥अस्यआरंभे
मध्येवाप्रत्यूहोदोषजनकोदृष्टः॥इदंलादौमध्येपिप्रत्यूहउत्तरोत्तरक्रीडारंभकएवेत्यारंभस्याद्भुतत्वंसूचितं॥कुत्रकेनप्रत्यूहइत्यत्रा
ह।निविडाश्लेषेकर्तव्येपुलकांकुरेण।क्रीडाकूतविलोकनेनिमेषेण।अधरसुधापानेकथानर्मभिः आनंदाधिगमेऽस्मिन्ननिर्वचनीयमन्म
थकलायुद्धेआनंदावेशवैवश्येनइति॥अनेनैतत्केलीनांपरमप्रेमविलासत्वंदर्शितं॥२॥ ५२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



ननस्तस्यारसावेशावसरे प्रियोऽधरं पीतवानित्याह ॥ धन्यमात्मानं मन्यमानः श्रीकृष्णराधाया आननं पिबति । कीदृश्याः हर्षोत्
कर्षस्य विमुक्त्या प्रसृ    ताभिः सहावर्तुमशक्यात तुर्यस्याः ॥ कीदृशः । कस्तूरिकया श्यामयोः कुचयोः पयोधरयोः रूपरिप
रिष्वंगो विद्यते यस्य ॥ आननपाने हेतुगर्भविशेषणमाह ॥ मीलद्दृष्टि मिलत्कपोलेपुलकं ॥ तथा च ॥ शीत्कारस्य धाध
रानवच्छिन्नतातस्या वशादव्यक्ताकुलाया केलिषु काकुस्तया विलसद्दिद्दंतांशुभिर्धौतो नुरंजितोऽधरो यत्र ॥ एतैः रसावेशः सूचितः

मीलद्दृष्टि मिलत्कपोलपुलकं शीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं । श्यामो
त्तुंगपयोधरोपरिपरिष्वंगी कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननं ॥५॥ तस्याः पाटल
पाणिजांकितमुरो निद्राकषाये दृशो निर्धौताधरशोणिमा विलुलिताः स्रस्तस्रजो मूर्द्धजाः ॥ कांचीदामदर
श्लथांचलमिति प्रातर्निरीक्ष्य दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ॥ ६ ॥

॥५॥ अथ सुरतांतचिह्नशोभितवपुर्दर्शनेन द्विगुणिताभिलाषः कृष्णोऽभूदित्याह ॥ तस्याउरः पाटलपुष्पवदरुणैर्नखैरं
कितं ॥ दृशौ निद्रयालोहिते । अधरशोणिमा चुंबनादिना क्षालितः ॥ केशाः विलुलिताः स्रस्ताः स्रजश्च यासु ताः दृशाः । बंध
शैथिल्यादितस्ततः प्रसृता इत्यर्थः ॥ कांचीदामेषत् श्लथ अंचलभागः ॥ एतानि मनो वैवश्यापादककामशरैः प्रातःसमये पत्युर्दृशो
र्लग्नैर्मनो विद्धमिति तदद्भुतमभूत् ॥ अन्यत्रार्पितशरैर    न्य    द्धमित्याश्चर्यमित्यर्थः ॥ तत्प्रसंगे पुनः पुनः पश्यन्नतृप्तिं जगा
मेत्यर्थः ॥ ६ ॥ ५७

श्रा १    द्वि १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



नकेवलं परमूहरण एवं बंधनादिकमपि प्रीतिजनकोऽयमभूदेवेति मध्यमावस्थामाह ॥ राधाविविध विलासपूरणनिपुनः कांतः श्रीकृष्णः कांतयासंजमनादिभिः परिभूतोपि न दृष्टित्वप्रतिच्छाण विलक्षणां सुखसंततिं प्राप्तदहो कामस्य दुर्लभोभिनिवेशकारिणः प्रेम्णो विलक्षण करणेभ्योपि विलक्षणाकार्योत्पादकतया वामलोकरीनीतरागतिरित्याश्चर्यं । एतदेवोपपादयति ॥ दोर्भ्यां बद्धपयोधरभरेणापीडितः नखैराविद्धः दंतैः क्षताधरपुटो यस्य तादृशः कृतः । श्रोणीतटेनाहतः हस्तेन केशं धृत्वा नमितः । अधरसुधापानेन विवशीकृतः इति ॥ ३ ॥ अथोपांत्यावस्थां सूचयन्नंत्यावस्थामाह ॥ रतिकेलिरेव संकुलरणः परस्पराहतसंग्रामस्तस्य

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः ॥ हस्तेनानमितः कचे धरसुधापानेन संमोहितः कांतः कामपितृप्तिमापतदहो कामस्य वामा गतिः ॥ ३ ॥ मारांके रतिकेलिसंकुलरणारंभे तया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् ॥ निस्पंदा जघनस्थली शिथिलता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति ॥ ४ ॥ " ॥ १ ॥ त्यं१

रंभेतया प्रकटिता लिप्रौढि जनित श्रमातिशयया श्रीराधया कांतजयाय उपरि कांतस्योपरि साहसप्रायं अत्यंतसमर्तो स्वित्यकं यत् किंचित् प्रारंभितं तत्संभ्रमात् संभ्रमजनितायास्मात् । जघनस्थली जाड्यान्निस्पंदा जाता । दोर्वल्ली शिथिलिता ॥ वक्षः उच्चैः कंपितं । अक्षि मीलितं । जाड्यैकत्वं । एतदेवार्थांतरन्यासेन दृढयति । सर्वावस्थास्वपि निश्चतिभीरुतया प्रसिद्धानां स्त्रीणां पौरुषरसः कुतः सिद्ध्यति । कीदृशे रणारंभे मारांके केलिपक्षे मारः कामः रणपक्षे मारणे ॥ उभयत्रांकं चिह्नं ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्मनः कीलनं तस्यैव भावनया द्योतयति ॥ इयं श्रीराधा विमर्द्दितमालाधारिण्यपि मां प्रीणयति ॥ पुनरप्युत्सुकं करोतीत्यर्थः ॥ न केवलमीदृशी अपि तु स्तनजघनपदं सद्यः पाणिनाच्छाद्य सत्रपं यथा स्यात्तथा मां पश्यंती ॥ वसनादिच्युतिरिक्तसहजस्वांगशोभा दर्शनात् प्रीणनं , तत्कालीनतच्छोभां व्यनक्ति ॥ केशपाशे व्यालोलः विक्षिप्त इत्यर्थः ॥ अलकैस्तरलितं । कपोलौ स्वेदेन लोलौ व्याप्ता वित्यर्थः ॥ बिंबाधरश्रीः क्षता । कुचकलसयोरुच्चास्पर्द्धयेव हारयष्टिः हारिता गमिता । कांची कांचिद्विश्लेषं गता । रसावेश-

> व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा बिंबाधरश्रीः कुचकलसरुचा हारिता हारयष्टिः ॥
> कांची कांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ॥७॥
> इति मनसा निगदंतं सुरतांते सा नितांतखिन्नांगी ॥ राधा जगाद सादरमिदमानंदेन गोविंदं ॥ च ॥ अथ कांतं रति-
> श्रांतमपि मंडनकांक्षया ॥ जगाद माधवं राधा मुग्धा स्वाधीनभर्तृका ॥८॥ ईदृगपीदं पद्यं कुत्रचित् ॥ ॥

शैथिल्ये निजांगेच्छादनात् मनः क्रीडाविशेषावेशाकलनात् सत्रप त्वमित्यर्थः ॥७॥ एवं प्रियदर्शनानंदोन्मत्ता प्रियं जगादेति तस्याः स्वाधीनभर्तृकावस्थां वर्णयिष्यन्नाह ॥ तल्लक्षणं यथा ॥ स्वायत्तासन्नदयिता भवेत्स्वाधीनभर्तृका इति ॥ सा स्ववशीकृतप्रियतमचित्ता । श्रीराधा रतिश्रांतमपि गोविंदं तदीच्छावकलनात् सादरं यथा तथा इदं तत्स्पर्शलोभेन वक्ष्यमाणं जगाद ॥ कीदृशं । इत्युक्तप्रकारं मनसा निगदंतं । कीदृशी । सुरतांते नितांतखिन्नांगी ॥

Dr. Urmila Sharma Collection, Varanasi

५५

यद्युगादतदेवाह ॥ यदुनंदने क्रीडति सति श्रीराधा निजगाद ॥ क्रीडतीति । सुरतांते पि च क्रीडितोद्यादखेडलील त्वमुक्तं । स्वेच्छामात्रे णकथं क्रीडनं सेत्स्यति । तस्याहृदयमानंदयति स्वचापल्येन पुनः क्रीडनायोन्मुखं करोतीति यस्तस्मिन् ॥ क्रीडति जगादेति । क्रीडन समये प्रियप्रेरणात्तस्या निरंतरस्वाधीनभर्तृकत्वप्राधान्यं द्योतितं ॥ छं ॥ किं निजगाद । हे यदुनंदने सुकरीत्या महाकूलोज्ज्व त्वेन सर्वातिशायिना यकगुणावबोधकसंबोधनं ॥ यदि पुनर्मनोभवमखारंभः संभवति तदा मम पयोधरे कस्तूरीपंत्रभंगं कर पल्लवेन कुरु ॥ कथं तत्र तत्करणीयं ॥ कामस्य यो मंगलकलसस्तत्सदृशे ॥ कीदृशेन । चंदनादप्यतिशीतलेन । मंगलकलसो

कुरु यदुनंदन चंदनशिशिरतरेण करेण पयोधरे ॥ मृगमदपत्रकमत्र मनोभवमंगलकलशसहोदरे ॥
॥१॥ निजगाद सा यदुनंदने क्रीडति हृदयानंदने ॥ छं ॥ अलिकुलगंजनसंजनकं रतिनायकसायकमोच
ने ॥ त्वदधरचुंबनलंबितकज्जलमुज्ज्वलय प्रियलोचने ॥ २ ॥ नयनकुरंगतरंगविकाशनिराशकरं श्रुतिमं
डले ॥ मनसिजपाशविलासधरे शुभवेश निवेशय कुंडले ॥ ३ ॥

पि चंदनादिना चित्रितः पल्लवेना छादनस्थाप्यते । अतस्त्वमपि तथा कुर्वित्यर्थः ॥ १ ॥ ततश्च हे प्रिय मम लोचने त्वदधरचुंबनेन लंबितं गलितं कज्जलं मुज्ज्वलय प्रकाशय । कीदृशं अलिकुलगंजनं संजनयतीति ताहृशं ॥ कीदृशे । रतिपतिसायका स्कटाक्षरूपान्मो च यतीति मोचने तस्मिन् ॥ २ ॥ ततश्च हे शुभवेश मम श्रुतिमंडले कुंडले अर्पय । कीदृशे । नयनमेव कुरंगस्तस्य तरंगो गतिः । भंगि स्फूरणं तस्य यः प्रकाशस्तस्य निवासकरं यच्छ्रुतिमंडलं तस्मिन् । पाशो मृगबंधनरज्जुः तस्य विलासधरे । तत्पाशभयादग्रेण यातीत्यर्थः ॥ ३ ॥ ५५

नकेवलं प्रत्यूहस्य बंधनादिकमपि जीत्विजनको वभूवेति मध्यमावस्थामाह ॥ राधा विविध विलासपूरणनिपुणः कांतः श्रीकृष्णः कां
तया संजमनादिभिः परिभूतोपि तृप्तिं प्रतिक्षणविलक्षणां सुखसंततिं प्राप तदहो कामस्य दुर्लभो भिनिवेशकारिणः प्रेम्णो वि
लक्षणकरणेभ्योपि विलक्षणकार्येति पादकतया वामंगी कृरीजीतरागतिरित्याश्चर्यं । एतदेवोपपादयति ॥ दोर्भ्यां बद्धपयोध
रभरेणापीडितः नखैराविद्धः दंतैः क्षताधरपुटो यस्य तादृशः कृतः । श्रोणीतटेनाहतः हस्तेन केशं धृत्वानमितः । अधरसुधा
पानेन विवशीकृतः इति ॥ ७ ॥ अथोपांत्यावस्थां सूचयन्नंत्यावस्थामाह ॥ रतिकेलिरेव संकुलरणः परस्पराहतसंग्राम स्तस्या

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः ॥ हस्तेनान
मितः कचेधरसुधापानेन संमोहितः कांतः कामपि तृप्तिमापतदहो कामस्य वामा गतिः ॥ ७ ॥ मारांके रति
केलिसंकुलरणारंभे तया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् ॥ निस्पंदा जघनस्थली
शिथिलता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति ॥ ४ ॥ " ॥ १ ॥ ग्रं १

रंभे तया प्रकटितातिप्रौढिजनितश्रमातिशयया श्रीराधया कांतजयाय उपरि कांतस्योपरि साहसप्रायं अत्यस्तसमस्तौचित्यक्र
यत् किंचित् प्रारंभि तत्संभ्रमात् संभ्रमजनितायास्यात् । जघनस्थली जाड्यान्निस्पंदा जाता । दोर्वल्ली शिथिलिता ॥ वक्षउच्चैः कंपि
तं । अक्षि मीलितं । जाड्यैकत्वं । एतदेवार्थांतरन्यासेन दृढयति । सर्वावस्थास्वपि निम्नतिभीरुतया प्रसिद्धानां स्त्रीणां पौ
रुषरसः कुतः सिद्ध्यति । कीदृशे रणारंभे मारांके केलिपक्षे मारः कामः रणपक्षे मारणे ॥ उभयत्रांकं चिह्नं ॥ ४ ॥

CC0. In Public Domain, Digitizagtion by eGangotri



ततस्तस्यारसावेशात्र सरे प्रियोऽधरं पीतवानित्याह ॥ धन्यमात्मानं मन्यमानः श्रीकृष्णो राधाया आननं पिबति । कीदृश्याः हर्षोत्
कर्षस्य विमुक्ताः प्रसू     नाभिः सहाभर्त्तुमशक्यात्तनुर्यस्याः ॥ कीदृशः । कस्तूरिकया श्यामयोः कुचयोः पयोधरयोः रूपरिप
रिष्वंगो विद्यतेऽस्य ॥ आननपाने हेतुगर्भविशेषणमाह ॥ मीलदृष्टिमिलत्कपोलपुलके ॥ तथा च ॥ शीत्कारस्य धा
रानवच्छिन्नता तस्या वशादव्यक्ता कुला या केलिषु काकुस्तया विलसन्ति दंतांशुभिर्धौतोनुरंजितोधरो यत्र ॥ एतैरसावेशः सूचितः

मीलदृष्टिमिलत्कपोलपुलकं शीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं ॥ श्यामो
त्तुंगपयोधरोपरिपरिष्वंगी कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननं ॥५॥ तस्याः पाटल
पाणिजांकितमुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलिताः स्रस्तस्रजो मूर्द्धजाः ॥ कांचीदामदर
श्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ॥ ६ ॥

॥५॥ अथ सुरतांतचिह्नशोभितवपुर्दर्शनेन द्विगुणिताभिलाषः कृष्णोऽभूदित्याह ॥ तस्याउरः पाटलपुष्पवद्रक्तैर्नखैरं
कितं ॥ दृशौ निद्रयालोहिते । अधरशोणिमा चुंबनादिनाक्षालितः ॥ केशाः विलुलिताः स्रस्ताः स्रजश्च याभ्यस्तादृशाः । वंध
शैथिल्यादितस्ततः प्रसृता इत्यर्थः ॥ कांचीदामेषत्श्लथ प्रांतभागः ॥ एभिर्मनो वैवश्यापादककामशरैः प्रातःसमये पत्युर्दृशो
र्लग्नैर्मनो विद्धमिति तदद्भुतमभूत् ॥ अमार्पितशरैर न्य    द्धमित्याश्चर्यमित्यर्थः ॥ तत्प्रसंगे पुनःपुनः पश्यन्तृप्तिं जगा

     मेत्यर्थः ॥ ६ ॥     

Dr. Urmila Sharma Collection, Varanasi

तन्मनः कीलनं तस्यैव भावनया द्योतयति ॥ इयं श्रीराधा विमर्द्दितमाला धारित्वेपि मां प्रीणयति ॥ पुनरस्तु तत्सुखं करोतीत्यर्थः ॥
न केवलमीदृशी अपि तु स्तनजघनपदं सद्यः पाणिनाच्छाद्य सत्रपं यथा स्यात्तथा मां पश्यंती ॥ वसनादिव्यतिरिक्तसहजप्रत्यंगशोभा
दर्शनात् प्रीणनं , तत्कालीनतच्छोभां व्यनक्ति ॥ केशपाशे व्यालोलः विच्छिन्न इत्यर्थः ॥ अलकैस्तरलितं । कपोलौ स्वेदेन लोलौ
व्याप्ता वित्यर्थः ॥ विंबाधरश्रीः क्षता । कुचकलसयोरुच्चास्पर्द्धयेव हारयष्टिर्हारिता गमिता । कांची कांचिद्द्युतिं गता । रसावेश

व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा विंबाधरश्रीः कुचकलसरुचा हारिता हारयष्टिः ॥
कांची कांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ॥ ७ ॥
इति मनसा निगदंतं सुरतांते सा नितांतखिन्नांगी ॥ राधा जगाद सादरमिदमानंदेन गोविंदं ॥ च ॥ अथ कांतं रति
श्रांतमपि मंडनकांक्षया ॥ जगाद माधवं राधा मुग्धा स्वाधीनभर्तृका ॥ ८ ॥ ईदृगपीदं पद्यं कुत्रचित् ॥ ॥

शैथिल्येभिजोगेक्षणादा ततः क्रीडाविशेषावेशाकलनात् सत्रप त्वमित्यर्थः ॥ ७ ॥ एवं प्रियदर्शनानंदोन्मत्ता प्रियं जगादेति तस्याः
स्वाधीनभर्तृकावस्थां वर्णयितुमाह ॥ तल्लक्षणं यथा ॥ स्वायत्तासन्नदयिता भवेत्स्वाधीनभर्तृका इति ॥ सा स्ववशीकृतप्रियतम
चित्ता । श्रीराधा रतिश्रांतमपि गोविंदं तदीक्षावकलनात् सादरं यथा तथा इदं तत्स्पर्शलोभेन वक्ष्यमाणं जगाद ॥ कीदृशं । इत्युक्तप्रका
रं मनसा निगदंतं । कीदृशी । सुरतांते नितांतखिन्नांगी ॥

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



यथागादत देवाह ॥ यदुनंदने क्रीडति सति श्रीराधा निजगाद ॥ क्रीडतीति । सुरतांतेपि चित्तक्रीडितोदयाद स्वेडलील त्वमुक्तं । स्वेच्छामात्रेणकर्थंक्रीडनं सेत्स्यति । तस्याहृदयमानंदयति स्वचापल्येन पुनक्रीडनायोन्मुखं करोतीति यस्त स्मिन् ॥ क्रीडति जगादेति । क्रीडनसमयेपि प्रियप्रेरणात्तस्या निरंतरस्वाधीनभर्तृकात्व प्राधान्यंद्योतितं ॥ ध्रु ॥ किंनिजगाद । हे यदुनंदने त्युक्तरीत्या महाकुलोद्भवत्वेन सर्वातिशायिनायकगुणावबोधक संबोधनं ॥ यदि पुनर्मनोभवमखारंभः संभवति तदा मम पयोधरे कस्तूरी पत्रभंगं करपल्लवेन कुरु ॥ कथंतत्रतत् करणीयं ॥ कामस्य यो मंगलकलसस्तत्स दृशे ॥ कीदृशेन । चंदनादप्यति शीतलेन । मंगलकलसो

कुरु यदुनंदन चंदन शिशिरतरेण करेण पयोधरे ॥ मृगमदपत्रकमत्र मनोभव मंगलकल सस होदरे ॥
॥१॥ निजगाद सा यदुनंदने क्रीडति हृदयानंदने ॥ ध्रु ॥ अलिकुलगंजन संजनकं रतिनायक सायक मोचने ॥ त्वदधरचुंबन लंबितकज्जलमुज्वलय प्रियलोचने ॥ २ ॥ नयनकुरंगतरंगविकाशनिराशकरस्कृतिमंडले ॥ मनसिजपाशविलासधरे शुभवेश निवेशय कुंडले ॥ ३ ॥

पि चंदनादिनाचित्रितः पल्लवेनाछाद्यस्याप्यते । अतस्त्वमपितथाकुर्वित्यर्थः ॥ १ ॥ ततश्च हे प्रिय मम लोचने त्वदधरचुंबनेन लंबितं गलितं कज्वलं पुनरुज्वलय प्रकाशय । कीदृशे अलिकुलगंजनं संजनयतीतितादृशे ॥ कीदृशे । रतिपतिसायकास्कटाक्षरूपास्तो चयतीति मोचनं तस्मिन् ॥ २ ॥ ततश्च हे शुभवेश मम श्रुतिमंडले कुंडले अर्पय । कीदृशे । नयनमेव कुरंगस्तस्यतरंगो गतिः । भंगि स्फूरणं तस्य यः प्रकाशस्तस्य निवासकरं यच्छ्रुतिमंडलं तस्मिन् । पाशो मृगवंधनरज्जुः तस्य विलासधरे । तत्पाशभयाद्ग्रेण यातीत्यर्थः ॥ ३ ॥ ५५

Dr. Urmila Sharma Collection, Varanasi

गीतः २ ललितं २

तदनंतरं मम मुखेलकं संस्कुरु ॥ तत्र हेतुः ॥ पूर्वाचरितसूचकतया सखीपरिहासजनकं । यतः संमुखे सुचिरं कालं व्याप्य मुखकमलस्योप
रीतः प्रसरणेन भ्रमरचयं रचयंतं । अतएव रुचिरे । कीदृशे । त्वत्कृतपानमध्वाधारतया जितकमले । भावोल्लासप्रसन्नतया विमले
। मुखस्य कमलत्वेनालकस्य भ्रमरत्वं ॥ ४ ॥ ततश्च हे स्मितविकसितोज्वलमुखमम ललाटचंद्रे मृगमदरसेन वलितं तिलकं ललितं य
थास्यात्तथा कुरु ॥ कीदृशे ॥ विहिताकलंककलाङ्कंशीयेन । ललाटस्य बालचंद्रत्वेन मृगमदतिलकं कलंकरूलत्वेन निरूपितं ॥

भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम संमुखे ॥ जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥ ४ ॥
मृगमदरसवलितं कुरु तिलकमलिकरजनीकरे ॥ विहितकलंककलंककमलानन विश्रमितश्रमशीकरे ॥ ५ ॥
मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे ॥ रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ॥ ६ ॥
सरसघने जघने मम शंवरदारणवारणकंदरे ॥ मणिरसनावसनाभरणानि शुभाशय वासय सुंदरे ॥ ७ ॥

कीदृशे विश्रमिताश्रपनीताः श्रंबुकणा यत्र ॥ तानपनीय तिलकं कुर्वित्यर्थः ॥ ५ ॥ किंच ॥ मत्प्रार्थनाकृतिकुशल मम केशे कुसुमानि कुरु ।
कीदृशे । संभोगावेगगलिते विकीर्णे ॥ तत्कालीनत्वद्ग्रहणमनोहरे ॥ तथा मानसजस्य यः ध्वजस्तस्य चामरे ॥ किंच । मयूरपुच्छस्येव
डामर आरोपो यस्य ॥ ६ ॥ ततश्च हे शुभाशय त्वत्करस्पर्शलोलुपे मम जघने मणिरसनावसनाभरणानि परिधापय ॥ कीदृशे ॥ रसः शृंगा
रस्तत्सहितं तत्कोपं घननिविडं च यत्तस्मिन् ॥ अपि च ॥ शंवरदारण एव वारणः हस्ती तस्य कंदरे । यतः सुंदरे ॥ ७ ॥

CC0. In Public Domain, Digitizagtion by eGangotri



श्रीजयदेववचसि सदयं यथा स्यात्तथा हृदयं कुरु ॥ स्निग्धांतःकरणस्यैवैतत्श्रवणयोग्यत्वात् ॥ यतः जयं श्रीकृष्णं ददातीति जयदं ।
तत्र हेतुः ॥ हरिचरणस्मरणमेवामृतं तेन कृतं कलिकलुषज्वरखंडनं येन ॥ अतएव मंडने भूषणरूपे ॥८॥ आत्मावेशेन तया पुन
रात्मन्तद्वचनश्रवणानंदितः श्रीकृष्णस्तथैवाकरोदित्याह ॥ हे कृष्ण कुचयोः पत्रं मकरिकापत्रं रचय ॥ कपोलयोश्चित्रं कुरुष्व
॥ जघने कांचीमर्पय । मालया कवरीभरं प्रापय । वलयश्रेणीं पाणौ कलय । पदे नूपुरौ कुरु । इत्यनेन प्रकारेण तया यथाज्ञप्तः पीतां
बरोपि वड्व वांछितलाभात्प्रीतस्तथा तथैवाकरोदित्यर्थः ॥ अपिशब्देन सुरतांतवसनव्यत्ययाभावेपि तदाज्ञानुवर्त्तनात्तस्याग्रान

श्रीजयदेववचसि जयदे सदयं हृदयं कुरु मंडने ॥ हरिचरणस्मरणामृतकृतकलिकलुषज्वरखंडने ॥ ८ ॥
रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंचस्रजा कवरीभरं ॥ कलय वलयश्रेणीं पाणौ प
दे कुरु नूपुराविति निगदितः प्रीतः पीतांबरोपि तथाकरोत् ॥ ९ ॥ यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वै
ष्णवं यच्छृंगारविवेकतत्त्वरचनाकाव्येषु लीलायितं ॥

शतदधीनत्वं हृदीकृतं ॥ ९ ॥ अथोपसंहारेपि स्वाभिष्टोपासनायाः सर्वोत्तमतानिश्चयावेशेन कारुण्योदयात्तत्र तत्र संदिहानान्भाक्ति
रसिकान्प्रत्याह ॥ भोः सुधियः श्रीकृष्णभक्तिरसवासितचित्ताः पेडासदसद्विवेचिकाबुद्धिस्तयान्विताः कविः सत्काव्यकर्त्ता तथा
भूतस्य जयदेवपंडितकवेः श्रीगीतगोविंदतस्तत्सर्वदुर्लभलाभानंदेन सहिताः संतः परिः सर्वतोभावेन शोधयंतु शंकापंकमुद्धूय
निश्चिन्वंतु । तत्किं । यद्गांधर्वकलासु संगीतशास्त्रोक्तस्वररागतालगीतादिषु यन्नैपुण्यं तदेतन्निबद्धानुसारेण निश्चिन्वंतु इत्यर्थः ॥ ५६

Dr. Urmila Sharma Collection, Varanasi

नकेवलमिदमपितु यद्वै तत्त्वं सर्वव्यापनशीलस्य विष्णोः सर्वावतारिणो चिंतानंतशक्तेः स्वयंभगवतः श्रीकृष्णस्य भजनविषयं यद
नुध्यानं तत्राभिप्रायचिंतनं तल्लीलाविचारास्समाधानादनुक्षणं चिंतनं तदप्येत हृदयैव निश्चिनोतु। नित्यत्वसर्वोत्तमत्वनिश्चयेन हृदीकु
र्वतीत्यर्थः॥ तत्रापि दुरूहगतेः शृंगारस्य महाप्रेमरसविचारे यत्तत्वं दुरूहा तद्दुरूहव्रजसुंदरीलीलागतं तदप्येत: दनुसारे
ण महाभावपर्यंतं निश्चिनोतु॥ काव्येषु शब्दार्थानुप्रासव्यंगादिषु यल्लीलायितं। यथा कामिनी लीलावदाचरं तत्तथा वर्णनप्र
कारं॥ एतदनुसारेण वर्णयेत्॥ तत्र हेतुः॥ कृष्णे एकतानं एकाग्रेनन्यत्वं निरात्मा मनो यस्य॥ श्रीकृष्णस्यैकांतभक्तविशेषस्येव

तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतु सुधियः श्रीगीतगोविंदतः॥१०॥ पर्य्यं
कीकृतनागनायकफणाश्रेणीमणीनां गणे संक्रांतप्रतिबिंबसंकलनया बिभ्रद्वपुर्विक्रियां॥ पादांभोरुहधारि
वारिधिसुतामक्ष्णां दिदृक्षुः शतैः कायव्यूहमिवाचरन्नुपचितीभूतो हरिः पातु वः॥११॥

शेहत्व१

तद्भक्तैस्तावत्पर्यंतो विज्ञानसामर्थ्यात्॥१०॥ अथ श्रीराधिकासत्संगदर्शनादन्योद्ध्रुतकंठावगुंठितः श्रीकृष्णो नेत्रवाञ्छल्पम
निछन् श्रीशेषशायिनो लक्ष्मीदर्शनोत्कंठामुत्प्रेक्षितवान् सकौतुकेनाशिषं प्रयुक्ते॥ हे प्रिये हरिः शेषशायी वो युष्मान् ससखी
न् पातु॥ कीदृशः कायव्यूहमाचरन् निबोपचितीभूतो वृद्धिं प्राप्तः स्युत्प्रेक्षते॥ कथमेवमुत्प्रेक्षसे॥ पादांभोरुहधारिवारिधिसुतां
श्रीलक्ष्मीमक्ष्णां शतैर्द्रष्टुमिच्छुः॥ तत्प्रकारमाह॥ तल्पीकृतस्य फणाश्रेण्यां ये मणयस्तेषां गणे मिलितानां प्रतिबिंबानां प्रसरणेन वि
भुप्रक्रियां बिभ्रत्॥११॥

ता १ शेषस्य१

CC0. In Public Domain, Digitizagtion by eGangotri



ततोमुकुलितोत्कलिकयातद्वधूवलोक्यतस्यावैचित्यापत्तेपुनर्नारायणचरितवर्णनेनकौतुकमाननोदितिस्मरन्कविरा ति॥
हरिःश्रीकृष्णोवःपातु॥ कीदृशः। श्रीराधायावक्षोंचलमपसार्यस्तनकोरकोपरिमीलन्नेत्रः। कथंतन्नेत्रमिलनंसंभाव्यते। हेसुंदरिक्षी
रसमुद्रस्यतीरमध्येमयित्वयेवरपरांत्वामप्राप्यशिरोमूढःसन्कालकूटंविषमपिबदितिअहंशंके। नारायणस्मरणेनतदावेशादित्यने
नप्रकारेणपूर्वकथाभिःपुराणप्रसिद्धाभिस्तदस्मृतपूर्वाभिर्विस्मितचित्तायाः॥ क्वचित्क्वचित्तल्लीलानुकरणकौतुकावरणादपी
१ व्यथु ... कं॥१२॥ अथद्रुतेनमध्याह्नविहितेनोत्यचिरेणधीरइतिश्रुतोक्तिप्रामाण्यादेतच्छ्रवणकीर्तनस्मरणानुमोदनप्रभावमाह॥

त्वामप्राप्यमयिस्वयंवरपरांक्षीरोदतीरोदरेशंकेसुंदरिकालकूटमपिबन्मूढोमृडानीपतिः॥ इत्थंपूर्वकथाभि
रन्यमनसोविक्षिप्यवक्षोंचलंराधायांस्तनकोरकोपरिमिलन्नेत्रोहरिःपातुवः॥१२॥ साध्वीमाध्वीकचिंतान
भवति ... भवतःशर्करेकर्करासिद्राक्षेद्रक्ष्यंतिकेत्वाममृतमृतमसिक्षीरनीरंरसस्ते॥ माकंदक्रंदकांताधर
धरणितलंगच्छयच्छंतियावद्भावंशृंगारसारस्वतमिहजयदेवस्यविष्वग्वचांसि॥१३॥

हेमाध्वीकद्रह्लोकेयावत्जयदेवस्यवचांसिविष्वक्सर्वतःशृंगारसारस्वतंभावंददतितावद्भवतश्चिंतासाध्वीनभवति॥मधुरत्वेपिमाद
कत्वादित्यर्थः॥ हेशर्करेत्वंकर्करासि॥मादकत्वाभावेपिकठिनत्वात्॥ हेद्राक्षेत्वांकेद्रक्ष्यंति।कोमलत्वेपिगिरिवनादिप्राप्यत्वात्। हेअ
मृतत्वंमृतमसि॥मरणानंतरप्राप्यत्वात्॥ हेक्षीरतेरसोनीरवत्॥आवर्तनाद्यपेक्षत्वात्॥ हेआम्रत्वंक्रंद॥त्वगष्ठ्यादिहेयांशसाहित्या
त्॥ हेकांताधरत्वंपातालमसुरालयंयाहि॥ अधोदात् ... नामत्वात्तवात्रस्थितिरपिनयुक्तेत्यर्थः॥श्रीजयदेवभणितमधुराख्यभक्तिर
सास्वादनिमग्नजनाघृणामेवकरिष्यतीत्यर्थः॥१३॥

स्लो १



Dr. Urmila Sharma Collection, Varanasi

अतःसर्गोयंसमृद्धिमदाख्यसंभोगरसानंदितःपीतांबरःप्रियापिमांविश्वसितंयावत्दर्पणंवसनप्रियःश्रीकृष्णोयंवसइतिसर्गः॥ ❁ ॥
१२॥ अथपितृमातृस्मरणपूर्वकपराशरादिमतज्ञाएवास्याधिकारिणइतितान्प्रत्याशिषयति॥ भोजदेवनामेस्यपितातस्मात्
प्रभवोयस्य रामादेवीनाम्न्यस्यजननीतस्याःसुतस्यजयदेवस्यगीतगोविंदाख्यंकवित्वंपराशरादीनांयेप्रियातन्मतज्ञानेनप्रिय

इतिश्रीजयदेवकृतौगीतगोविंदेसुप्रीतपीतांबरोनामद्वादशःसर्गः॥१२॥ ❁ ॥श्रीभोजदेवप्रभवस्य
रामादेवीसुतस्यश्रीजयदेवकस्य ॥पराशरादिप्रियवंधुकंठेगीतगोविंदकवित्वमस्तु॥ ❁ ॥

त्वंप्राप्नोतिमपिष्ठेवंधवस्तत्रातसारराधामाधवरहःकेलिज्ञानंधुत्वंप्राप्नोत्तेमामिवकेउभूषणवत्सदास्तु॥अनेनास्यप्रवंधस्य
सर्ववेदपुराणेतिहासप्रकृष्णं [illegible] संमत्यासर्वसारत्वंनित्यत्वंविरलत्वंचवोधितं॥अत्रायंक्रमः॥
आदौश्रीकृष्णस्यश्रेष्ठ्यंपादनेप्रलयपयोधिजलइत्यादिवसंतेवासंतीत्यनेन॥ ❁ ॥ततःश्रीराधिकायाःकेसारिरपीत्यंतेन॥
तत्रैवसाधरणलीलाःतस्याउत्कंठावर्णनंच। ततःकृष्णस्याप्युत्कंठायमुनातीरेत्यंतेन॥ततःश्रीकृष्णेराधिकोत्कंठाकथने

दि ३ ४ नेन

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

पूर्वं यत्रेत्यंतेन ॥ ततोस्या अभिसारिकावस्थावर्णनं ॥ अपताभित्यंतेन ॥ ततो वासकसज्जावर्णनं अत्रांतरेत्यंतेन ॥ ततश्चं
द्रोदयानुपुनरुत्कंठा अपागताभित्यंतेन ॥ ततो विप्रलब्धा अथकथमपीत्यंतेन ॥ ततः खंडिता तामथेत्यंतेन ॥ ततः कल
हांतरिता अत्रांतरे मसृणरोषेत्यंतेन ॥ ततो मानिनीवर्णनं ॥ सुचिरेत्यंतेन ॥ ततः सखीप्रार्थनेंसोसाध्वसेत्यंतेन ॥ ततोन्यो
न्यावलोकनवर्णनं गतवतीत्यंतेन ॥ ततः श्रीकृष्णप्रार्थना अत्यूहेत्यंतेन ॥ ततो रहः केलयः इतिमनसेत्यंतेन ॥ ततः
स्वाधीनभर्तृकायज्ञोधर्वकलास्वित्यंतेन ॥ इति ॥ ❀ ॥ यद्वत्स्ववालमुग्धोक्तोपिताप्रीति[illegible]प्यते ॥ तद्वत् श्रीचैतन्यः
प्रीयतामत्र जल्पिते ॥ १ ॥ श्रीगोविंदपादसेवाप्रभावाद्वदितास्त्वयं । चैतन्यदासतो वालवोधिनी स्यात्सतां मुदे ॥ २ ॥
समाप्तेयं वालवोधिनी ॥ ❀ ॥ ❀ ॥ ❀ ॥ श्रीराधाकृष्णाभ्यां नमः ॥ ❀ ॥ ❀ ॥ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

# पाण्डुलिपि: समाप्ता

# MANUSCRIPT ENDS

ختم شد

Dr. Urmila Sharma Collection, Varanasi